जम्बूशहरकेविद्याविलासनामकमुद्रायंत्रालयमें
पराशरस्मृति श्रीपंडितशंकरनाथजीकेअधिका
रसेंमुद्रितभयीपंडितनानकचंदजीनेशोधी ॥

प० ॐश्रीगणेशायनमः अथातोहिमशैलाग्रेदेवदारुवनालये व्यासमेकाग्रमासीनमपृच्छ
१ न्नृषयःपुरा ॥ १ ॥ मानुषाणांहितंधर्मंवर्त्तमानेकलौयुगे शौचाचारंयथावच्चवदसत्यव-
तीसुत ॥ २ ॥ तत्श्रुत्वाऋषिवाक्यंतुसाशिष्योऽग्न्यर्कसन्निभः प्रत्युवाचमहातेजाःश्रुति-
स्मृतिविशारदः ॥ ३ ॥ नचाहंसर्वतत्त्वज्ञःकथंधर्मंवदाम्यहम् अस्मत्पितैवप्रष्टव्यइति
व्यासःसुतोवदत् ॥ ४ ॥ ततस्तेऋषयःसर्वेधर्मतत्त्वार्थकांक्षिणः ऋषिंव्यासंपुरस्कृ-
त्यगतावदरिकाश्रमम् ॥ ५ ॥ नानापुष्पलताकीर्णंफलपुष्पैरलंकृतम् नदीप्रस्रवणोपेतं
पुण्यतीर्थोपशोभितम् ॥ ६ ॥ मृगपक्षिनिनादाढ्यंदेवतायतनावृतम् यक्षगंधर्वसिद्धै
श्चनृत्यगीतैरलंकृतम् ॥ ७ ॥ तस्मिन्नृषिसभामध्येशक्तिपुत्रंपराशरम् सुखासीनंमहा
तेजा मुनिमुख्यगणावृतम् ॥ ८ ॥ कृतांजलिपुटोभुत्वाव्यासस्तुऋषिभिःसह प्रदक्षि-
णाभिवादैश्चस्तुतिभिःसमपूजयत् ॥ ९ ॥ अथसंतुष्टहृदयःपराशरमहामुनिः आहसु- १
स्वागतंब्रूहीत्यासीनोमुनिपुंगवः ॥ १० ॥ कुशलंसम्यगित्युक्त्वाव्यासःपृच्छत्यनंतरम्

यदिजानासिमेभक्तिंस्नेहाद्वाभक्तवत्सलम् ॥ ११ ॥ धर्मंकथयमेतातअनुग्राह्योह्यहं-
तव श्रुतामेमानवाधर्मावासिष्ठाःकाश्यपास्तथा ॥ १२ ॥ गार्गीयागौत्तमीयाश्चतथा
चौशनसाःस्मृताः अत्रेर्विष्णोश्चसंवर्तादक्षादंगिरसस्तथा॥ १३ ॥ शातातपाच्चहा
रीतायाज्ञवल्क्यात्तथैवच आपस्तंबकृताधर्माःशंखस्यालिखितस्यच ॥ १४ ॥ कात्या
यनकृताश्चैवतथाप्राचेतसान्मुनेः श्रुताह्येतेभवत्प्रोक्ताःश्रुत्यार्थमेनविस्मृताः ॥ १५ ॥
अस्मिन्मन्वंतरेधर्माःकृतत्रेतादिकेयुगे सर्वेधर्माःकृतेजाताःसर्वेनष्टाःकलौयुगे ॥ १३ ॥
चातुर्वर्ण्यसमाचारंकिंचित्साधारणंवद चतुर्णामपिवर्णानांकर्त्तव्यंधर्मकोविदैः ॥ १७ ॥
ब्रूहिधर्मस्वरूपज्ञसूक्ष्मंस्थूलंचविस्तरात् व्यासवाक्यावसानेषुमुनिमुख्यःपराशरः
॥ १८ ॥ धर्मस्यनिर्णयंप्राहसूक्ष्मंस्थूलंचविस्तरात् शृणुपुत्रप्रवक्ष्यामिशृण्वंतुमु
नयस्तथा ॥ १९ ॥ कल्पेकल्पेक्षयोत्पत्त्याब्रह्माविष्णुमहेश्वराः श्रुतिस्मृतिसदाचारनि
र्णेतारश्चसर्वदा॥ २० ॥ नकश्चिद्वेदकर्त्ताचवेदंस्मृत्वाचतुर्मुखः तथैवधर्मान्स्मरतिम

अन्येकृतयुगेधर्मास्त्रेतायांद्वापरेयुगे अन्येकलियुगेपुंसायु
प० नुःकल्पांतरेंतरे ॥ २१ ॥ अन्येकृतयुगेधर्मास्त्रेतायांद्वापरेयुगे अन्येकलियुगेपुंसायु
२ गरूपाऽनुसारतः ॥ २२ ॥ तपःपरंकृतयुगेत्रेतायांज्ञानमुच्यते द्वापरेयज्ञमेवाहुर्दा
नमेवकलौयुगे ॥ २३ ॥ कृतेतुमानवाधर्मास्त्रेतायांगौत्तमाःस्मृताः द्वापरेशंखलिखि
ताःकलौपाराशराःस्मृताः ॥ २४ ॥ त्यजेद्देशंकृतयुगेत्रेतायांग्राममुत्सृजेत् द्वापरे
कुलमेकंतुकर्त्तारंतुकलौयुगे ॥ २५ ॥ कृतेसंभाषणादेवत्रेतायांस्पर्शनेनच द्वापरेत्वन्न
मादायकलौपततिकर्मणा ॥ २६ ॥ कृतेतात्क्षणिकःशापस्त्रेतायांदशभिर्दिनैः द्वापरेचै
कमासेनकलौसंवत्सरेणतु २७ अभिगम्यकृतेदानंत्रेतास्वाहूयदीयते द्वापरेयाच
मानायसेवयादीयतेकलौ २८ अभिगम्योत्तमंदानमाहूयैवतुमध्यमम् अधमंयाचमा
नायसेवादानंतुनिष्फलम् २९ जितोधर्मोह्यधर्मेणसत्यंचैवानृतेनच जिताश्चौरैश्चरा
जानःस्त्रीभिश्चपुरुषाजिताः ३० सीदंतिचाऽग्निहोत्राणिगुरुपूजाप्रणश्यति कुमार्यं २
श्चप्रसूयंतेतस्मिन्कलियुगेसदा ३१ कृतेत्वस्थिगताःप्राणास्त्रेतायांमांसमाश्रिताः द्वाप

रेरुधिरंचैवकलौत्वन्नादिषुस्थिताः ३२ युगेयुगेचयेधर्मास्तत्रतत्रचयेद्विजाः तेषांनिं
दानकर्त्तव्यायुगरूपाहितेद्विजाः ३३ युगेयुगेतुसामर्थ्यंशेषंमुनिविभाषितम् पराशरे
णचाप्युक्तंप्रायश्चित्तंविधीयते ३४ अहमद्यैवतत्सर्वमनुस्मृत्यब्रवीमिवः चातुर्वर्ण्यसमा
चारंशृण्वंतुऋषिपुंगवाः ३५ पराशरमतंपुण्यंपवित्रंपापनाशनम् चिंतितंब्राह्मणार्था
यधर्मसंस्थापनायच ३६ चतुर्णामपिवर्णानामाचारोधर्मपालकः आचारभ्रष्टदेहानांभ
वेद्धर्मःपराङ्मुखः ३७ षट्कर्माभिरतोनित्यंदेवतातिथिपूजकः हुतशेषंतुभुंजानोब्रा
ह्मणोनावसीदति ३८ संध्यास्नानंजपोहोमोदेवतानांचपूजनम् आतिथ्यंवैश्वदेवंचषट्
कर्माणिदिनेदिने ३९ इष्टोवायदिवाद्वेष्योमूर्खःपंडितएववा संप्राप्तोवैश्वदेवांतेसोतिथिः
स्वर्गसंक्रमः ४० दूराच्चोपगतंश्रांतंवैश्वदेवउपस्थितम् अतिथिंतंविजानीयान्नातिथिः
पूर्वमागतः ४१ नपृच्छेद्गोत्रचरणेस्वाध्यायंचव्रतानिच हृदयंकल्पयेत्तस्मिन्सर्वदेवमयो
हिसः ४२ नैकग्रामीणमतिथिंसंगृह्णीतकदाचन अनित्यमागतोयस्मात्तस्माददति

प० थिरुच्यते ४३ अतिथिंतत्रसंप्राप्तंपूजयेत्स्वागतादिना तथासनप्रदानेनपादप्रक्षा
३ लनेनच ४४ श्रद्धयाचान्नदानेनप्रियप्रश्नोत्तरेणच गच्छतश्चानुयानेनप्रीतिमुत्पादये
द्गृही ४५ अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्त्तते पितरस्तस्यनाऽश्नंतिदशवर्षाणि
पंचच ॥ ४६ ॥ काष्टभारसहस्त्रेणघृतकुंभशतेनच अतिथिर्यस्यभग्नाशस्तस्यहोमोनि
रर्थकः॥ ४७॥सुक्षेत्रेवापयेद्बीजंसुपात्रेनिक्षिपेद्धनम् सुक्षेत्रेचसुपात्रेचह्युप्तंदत्तंननश्य
ति ४८ अपूर्वः सुव्रतीविप्रोह्यपूर्वश्चातिथिस्तथा वेदाभ्यासरतोनित्यमपूर्वोहिदिने
दिने ४९ वैश्वदेवेतुसंप्राप्तेभिक्षुकेगृहमागते उद्धृत्यवैश्वदेवार्थंभिक्षांदत्त्वाविसर्जयेत्
५० यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ तयोरन्नमदत्त्वाचभुक्त्वाचांद्रायणंचरेत्
५१ दद्याच्चभिक्षात्रितयंपरिव्राट्ब्रह्मचारिणोः इच्छयाचततोदद्याद्विभवेसत्यवारितम्
५२ यतिहस्तेजलंदद्याद्भैक्ष्यंदद्यात्पुनर्जलम् तद्भैक्ष्यंमेरुणातुल्यंतज्जलंसागरो ३
पमम् ५३ यस्यच्छत्रंहयश्चैवकुंजरारोहमृद्धिमत् ऐंद्रस्थानमुपासीततस्मात्तंनविचा

रयेत् ५४ वैश्वदेवकृतंपापंशक्तोभिक्षुर्व्यपोहितुम् नहिभिक्षुकृतंदोषंवैश्वदेवोव्यपो
हति ५४ अकृत्वावैश्वदेवंतुयेभुंजंतेद्विजातयः तेषामन्नंनभुंजीतकाकयोनिंव्रजंतिते
५५ अकृत्वावैश्वदेवंतुभुंजंतेयेद्विजाधमाः सर्वेतेनिष्फलाज्ञेयाःपतंतिनरकेऽशुचौ
५६ वैश्वदेवविहीनायेआतिथ्येनवहिष्कृताः सर्वेतेनरकंयांतिकाकयोनिंव्रजंतिच ५७
शिरोवेष्ट्यतुयोभुंक्तेदाक्षिणाभिमुखस्तुयः वामपादकरन्यस्तंतद्वैरक्षांसिभुंजते ५८
यतयेकांचनंदत्त्वातांवूलंव्रह्मचारिणे चौरेभ्योप्यभयंदत्त्वादातापिनरकंव्रजेत् ५९ शुक्ल
वस्त्रंचयानंचतांवूलंधातुमेवच प्रतिगृह्यकुलंहन्यात्प्रतिगृह्णातियस्यच ६० चौरोवाय
दिचांडालःशत्रुर्वापितृघातकः वैश्वदेवेतुसंप्राप्तसोतिथिःस्वर्गसंक्रमः ६१ नगृह्णाति
तुयोविप्रोआतिथिंवेदपारगम् अदत्तंचान्नमात्रंतुभुक्त्वाभुंक्तेतुकिल्विषम् ६२ व्राह्मणस्य
मुखंक्षेत्रंनिरूषरमकंटकम् वापयेत्सर्ववीजानिसाकृषिःसर्वकामिका ६३ अव्रताह्यन
धीयानायत्रभैक्ष्यचराद्विजाः तंग्रामंदंडयेद्राजाचौरभक्तप्रदोहिसः ६४ क्षत्रयोहिप्रज

प० रक्षन्शस्त्रपाणिः प्रदंडवान् निर्जित्यपरसैन्यानिक्षितिंधर्मेणपालयेत् ६५ नश्रीःकुल
४ क्रमाज्जाताभूषणोल्लिखिताऽपिवा खड्गेनाक्रम्यभुंजीतवीरभोग्यावसुंधरा ६६ पुष्पंपु
ष्पंविचिनुयान्मूलच्छेदंनकारयेत् मालाकारइवाऽरामेनयथांगारकारकः ६७ लाभक
र्मतथारत्नंगवांचपरिपालनम् कृषिकर्मचवाणिज्यंवैश्यवृत्तिरुदाहृता ६८ शूद्रस्यद्विज
शुश्रूषापरमोधर्मउच्यते अन्यथाकुरुतेकिंचित्तद्भवेत्तस्यानिष्फलम् ६९ लवणंमधुतै
लंचदधितक्रंघृतंपयः नदुष्येच्छूद्रजातीनांकुर्यात्सर्वेषुविक्रयम् ॥ ७० ॥ विक्रीणन्म
द्यमांसानिह्यभक्षस्यचभक्षणम् कुर्वन्नगम्यागमनंशूद्रः पततितत्क्षणात् ७१ कपि
लाक्षीरपानेनब्राह्मणीगमनेनच वेदाक्षरविचारेणशूद्रस्यनरकंध्रुवम् ७२ इतिपाराशरी
येधर्मशास्त्रेचातुर्वर्ण्याचारोनामप्रथमोऽध्यायः ॥ १ ॥ अतः परंगृहस्थस्यकर्माचारंकलौ
युगे धर्मंसाधारणंशक्त्याचातुर्वर्ण्यात्क्रमागतम् १ तंप्रवक्ष्याम्यहंपूर्वंपराशरवचो ४
यथा षट्कर्मसहितोविप्रः कृषिकर्मचकारयेत् २ क्षुधितंतृषितंश्रांतंबलीवर्दंनयोजयेत्

हीनांगंव्याधितंक्लीवंवृषंविप्रोनवाहयेत् ॥ ३ ॥ स्थिरांगंनीरुजंदृप्तंसुनर्दंषंढवर्जितम्
वाहयेद्दिवसस्यार्द्धंपश्चात्स्नानंसमाचरेत् ॥ ४ ॥ जप्यंदेवार्चनंहोमंस्वाध्यायंचैवमभ्यसे
त् एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः ५ स्वयंकृष्टेतथाक्षेत्रेधान्यैश्चस्वयमर्जि
तैः निर्वपेत्पंचयज्ञांश्चक्रतुदक्षांचकारयेत् ६ तिलारसानविक्रेयाविक्रेयाधान्यतस्समाः
विप्रस्यैवंविधावृत्तिस्तृणकाष्टादिविक्रयः ७ ब्राह्मणश्चेत्कृषिंकुर्यात्तन्महादोषमाप्नुयात्
अष्टगवंधर्महलंषड्गवंवृत्तिलक्षणम् ८ चतुर्गवंनृशंसानांद्विगवंगोजिघांसुवत् द्विगवंवा
हयेत्पादंमध्यान्हेतुचतुर्गवम् ९ षड्गवंतुत्रियामाहेष्टाभिःपूर्णंतुवाहयेत् नाप्नोतिनरकेष्वे
वंवर्त्तमानस्तुवैद्विजः ॥ १० ॥ दानंदद्याच्चवैतेषांप्रशस्तंस्वर्गसाधनम् संवत्सरेणयत्पापं
मत्स्यघातीसमाप्नुयात् ॥ ११ ॥ अयोमुखेनकाष्टेनतदेकाहेनलांगली पाशकोमत्स्यघा
तीचव्याधःशाकुनिकस्तथा ॥ १२ ॥ अदाताकर्षकश्चैवपंचैतेसमभागिनः कंडनी
पेषणीचुल्लीउदकुंभीचमार्ज्जनी ॥ १३ ॥ पंचसूनागृहस्थस्यत्रहन्यहनिवर्त्तते वैश्वदे,

प० वोवलिर्भिक्षागोग्रासोहंतकारकः ॥१४॥ गृहस्थःप्रत्यहंकुर्यात्सूनादोषैर्नलिप्यते
९ वृक्षंछित्त्वामहींभित्त्वाहत्वाचकृमिकीटकान् ॥ १५ ॥ कर्षकःखलुयज्ञेनसर्वपापैःप्रमु
च्यते योनदद्याद्द्विजातिभ्योराशिमूलमुपागतः ॥ १६ ॥ सचौरःसचपापिष्ठोब्रह्मघ्नंतं
विनिर्द्दिशेत् राज्ञेदत्त्वातुषड्भागंदेवानांचैकविंशकम् ॥ १७ ॥ विप्राणांत्रिंशकंभागं
सर्वपापैःप्रमुच्यते क्षत्रियोपिकृषिंकृत्वादेवान्विप्रांश्चपूजयेत् ॥ १८ ॥ वैश्यःशूद्रस्त
थाकुर्यात्कृषिवाणिज्याशिल्पकम् विकर्मकुर्वतेशूद्राःद्विजशुश्रूषयोज्झिताः ॥ १९ ॥ भवं
त्यल्पायुषस्तेवैनिरयंयांत्यसंशयम् चतुर्णामपिवर्णानामेषधर्मःसनातनः ॥ २० ॥
इतिपाराशरीयेधर्मशास्त्रेगृहस्थधर्माचारोनामद्वितीयोध्यायः ॥ २ ॥ अतःशुद्धिंप्रव
क्ष्यामिजननेमरणेतथा दिनत्रयेणशुद्ध्यंतिब्राह्मणाःप्रेतसूतके ॥ १ ॥ क्षत्रियोद्वादशा स्मृ०
हेनवैश्यःपंचदशाहकैः शूद्रःशुद्ध्यतिमासेनपराशरवचोयथा ॥ २ ॥ उपासनेतुविप्रा ९
णामंगशुद्धिश्चजायते ब्राह्मणानांप्रसूतौतुदेहस्पर्शोविधीयते ॥ ३ ॥ जातौविप्राद

शाहेनद्वादशाहेनभूमिपः वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यति ॥ ४ ॥ एकाहाच्छु
द्ध्यतेविप्रोयोग्निवेदसमन्वितः त्र्यहात्केवलवेदस्तुद्विहीनोदशभिर्दिनैः ॥ ५ ॥ जन्मक
र्मपरिभ्रष्टःसंध्योपासनवर्जितः नामधारकविप्रस्तुदशाहंसूतकीभवेत् ॥ ६ ॥ अजागा
वोमहिष्यश्चब्राह्मणीनवसूतका दशरात्रेणशुद्ध्येतभूमिस्थंचनवोदकम् ॥ ७ ॥ एक
पिंडास्तुदायादाःपृथग्दारानिकेतनाः जन्मन्यपिविपत्तौचतेषांतत्सूतकंभवेत् ॥ ८ ॥ता
वत्तत्सूतकंगोत्रेचतुर्थपुरुषेणतु दायाद्विच्छेदमाप्नोतिपंचमोवात्मवंशजः ॥ ९ ॥ चतुर्थे
दशरात्रंस्यात्षण्निशाःपुंसिपंचमे षष्ठेचतुरहाच्छुद्धिः सप्तमेतुदिनत्रयात् ॥ १० ॥
भृग्वग्निमरणेचैवदेशांतरमृतेतथा बालेप्रेतेचसंन्यस्तेसद्यःशौचंविधीयते ॥ ११ ॥ दे
शांतरमृतःकश्चित्सगोत्रःश्रूयतेयदि नत्रिरात्रमहोरात्रंसद्यःस्नात्वाशुचिर्भवेत् ॥ १२ ।
देशांतरगतोविप्रःप्रवासात्कालकारितात् देहनाशमनुप्राप्तास्तिथिर्नज्ञायतेयदि ॥ १३
कृष्णाष्टमीत्वमावस्याकृष्णाचैकादशीचया उदकंपिंडदानंचतत्रश्राद्धंचकारयेत् ॥ १४

प० अजातदंतायेबालायेचगर्भाद्विनिःसृताः नतेषामग्निसंस्कारोनाशौचंनोदकाक्रिया १५
६ यदिगर्भोविपद्येतस्रवतेवापियोषितः यावन्मासस्थितोगर्भोदिनंतावत्तुसूतकम्॥ १६ ॥
आचतुर्थाद्भवेत्स्रावःपातःपंचमषष्ठयोःअतऊर्ध्वंप्रसूतिःस्याद्दशाहंसूतकंभवेत् ॥ १७
दंतजातेनुजातेचकृतचूडेचसंस्थिते अग्निसंस्करणेतेषांत्रिरात्रमशुचिर्भवेत् १८
आदंतजन्मतःसद्यआचूडान्नैशिकीस्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् १९
ब्रह्मचारीगृहेयेषांहूयतेचहुताशने संपर्कंचेन्नकुर्वंतिनतेषांसूतकंभवेत् ॥ २० ॥
संपर्काद्दुष्यतेविप्रोजननेमरणेतथा संपर्काच्चानिवृत्तस्यनप्रेतंनैवसूतकम् ॥ २१ ॥ शि
ल्पिनःकारुकावैद्यादासीदासाश्चनापिताः राजानःश्रोत्रियाश्चैवसद्यः शौचाः प्रकीर्त्ति
ताः २२ सव्रतोमंत्रपूतश्चआहिताग्निश्चयोद्विजः राज्ञश्चसूतकंनास्तियस्यचेच्छतिपा
र्थिवः २३ उद्यतोनिधनेदानेआर्त्तोविप्रोनिमंत्रितः तथैवऋषिभिर्दृष्टंयथाकालेनशुद्ध्यति स्मृ०
२४ प्रसवेगृहमेधीतुनकुर्यात्संकरंयदि दशाहाच्छुध्येत्माताप्यवगाह्यपिताशुचिः२५ ६

सर्वेषांशावमाशौचंमातापित्रोस्तुसूतकम् सूतकंमातुरेवस्यादुपस्पृश्यपिताशुचिः २६ य
दिपत्न्यांप्रसूतायांसंपर्कंकुरुतेद्विजः सूतकंतुभवेत्तस्ययदिविप्रःषडंगवित् २७ संपर्का
ज्जायतेदोषोनान्योदोषोस्तुवैद्विजे तस्मात्सर्वप्रयत्नेनसंपर्कंवर्जयेद्बुधः २८ विवाहोत्सव
यज्ञेषुत्वंतरामृतसूतके पूर्वसंकल्पितंद्रव्यंदीयमानंनदुष्यति २९ अंतरातुदशाहस्यपुन
र्मरणजन्मनी तावत्स्यादशुचिर्विप्रोयावत्तत्स्यादनिर्दिशम् ३० ब्राह्मणार्थेविपन्नानांवंदि
गोग्रहणेतथा आहवेषुविपन्नानामेकरात्रमशौचकम् ३१ द्वाविमौपुरुषौलोकेसूर्यमंडल
भेदिनौ परिव्राट्योगयुक्तश्चरणेचाभिमुखोहतः ३२ यत्रयत्रहतः शूरःशत्रुभिःपरिवेष्टि
तः अक्षयांल्लभतेलोकान्यदिक्लीवंनभाषते ३३ संन्यस्तंब्राह्मणंदृष्ट्वास्थानाच्चलतिभा
स्करः एषमेमंडलंभित्त्वापरंस्थानंप्रयास्यति ३४ यस्तुभग्नेषुसैन्येषुविद्रवत्सुसमंततः प
रित्रातायदागच्छेत्सचक्रतुफलंलभेत् ३५ यस्यछेदक्षतंगात्रंशरमुद्गरयाष्टिभिः देवक
न्यास्तुतंवीरंहरंतिरमयंतिच ३६ देवांगनासहस्राणिशूरमायोधनेहतम् त्वरमाणाःप्रधा

प० वंतिममभर्त्तामममेतिच ३७ यंयज्ञसंघैस्तपसाचविप्रा : स्वर्गैषिणोवात्रयथैवयांति क्ष-
७ णेनयांत्वेवहितत्रवीराः प्राणान्सुयुद्धेनपरित्यजंते ३८ जितेनलभ्यतेलक्ष्मीर्मृतेना-
पिसुरांगना : क्षणध्वंसिनिकायेस्मिन्काचिंतामरणेरणे ३९ ललाटदेशेरुधिरंस्रव
च्चयस्याहवेतुप्रविशेच्चवक्रम् तत्सोमपानेनकिलास्यतुल्यंसंग्रामयज्ञेविधिवच्चदृष्टम् ४०
अनाथब्राह्मणंप्रेतंयेवहंतिद्विजातयः पदेपदेयज्ञफलमानुपूर्व्याल्लभंतिते ४१ नते-
षामशुभंकिंचित्पापंवाशुभकर्मणाम् जलावगाहनात्तेषांसद्यःशौचंविधीयते ४२ अ-
सगोत्रमबंधुंचप्रेतीभूतंद्विजोत्तमम् वहित्वाचदहित्वाचप्राणायामेनशुद्ध्यति ४३ अ-
नुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेववा स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुद्ध्यति ४४
क्षत्रियंमृतमज्ञानाद्ब्राह्मणोयोनुगच्छति एकाहमशुचिर्भूत्वापंचगव्येनशुद्ध्यति ४५ स्मृ०
शवंचवैश्यमज्ञानाद्ब्राह्मणोह्यनुगच्छति कृत्वाशौचंद्विरात्रंचप्राणायामान्षडाचरेत् ४६ ७
प्रेतीभूतंतुयः शूद्रंब्राह्मणोज्ञानदुर्बलः अनुगच्छेन्नीयमानंत्रिरात्रमशुचिर्भवेत् ४७

त्रिरात्रेतुततःपूर्णेनदींगत्वासमुद्रगाम् प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यति ४८
विनिवर्त्त्ययदाशूद्राःउदकांतमुपस्थिताः द्विजैस्तदानुगंतव्याएषधर्मःसनातनः ४९
तस्माद्द्विजोमृतंशूद्रंनस्पृशेन्नचदाहयेत् दृष्टेसूर्यावलोकेनशुद्धिरेषापुरातनी ॥ ५० ॥ इति
पाराशरीयेधर्मशास्त्रेजननमरणसूतकादिशुद्धिर्नामतृतीयोऽध्यायः ३ अतिमानादतिक्रो
धात्स्नेहाद्वायादिवाभयात् उद्बध्नीयात्स्त्रीपुमान्वागतिरेषाविधीयते १ पूयशोणितसंपूर्णे
त्वंधेतमसिमज्जति षष्टिवर्षसहस्राणिनरकंप्रतिपद्यते २ नाशौचंनोदकंनाग्निंनाश्रु
पातंचकारयेत् वोढारोऽग्निप्रदातारःपाशच्छेदकरास्तथा ३ तप्तकृच्छ्रेणशुध्यंती
त्येवमाहप्रजापतिः गोभिर्हतंतथोद्बद्धंब्राह्मणेनतुघातितम् ४ संस्पृशंतितुयेविप्रा-
वोढारश्चाग्निदाश्चये अन्येयेचानुगंतारःपाशच्छेदकराश्चये ॥ ५ तप्तकृच्छ्रेणशुद्धास्तेकु
र्युर्ब्राह्मणभोजनम् अनडुत्सहितांगांचदद्युर्विप्रायदक्षिणाम् ६ त्र्यहमुष्णंपिवेद्वारित्र्य
हमुष्णंपयःपिवेत् त्र्यहमुष्णंपिवेत्सर्पिर्वायुभक्षोदिनत्रयम् ७ षट्पलंतुपिवेदंभःत्रिप

प० लंतुपयःपिवेत् पलमेकांपिवेत्सार्पिस्तप्तकृच्छ्रंविधीयते ८ योवैसमाचरेद्विप्रःपतितादिष्व
८ कामतःपंचाहंवादशाहंवाद्वादशाहमथापिवा ९ मासार्द्धमासमेकंवामासद्वयमथापिवा
अब्दार्द्धमब्दमेकंवाभवेदूर्ध्वंहितत्समः १० त्रिरात्रप्रथमेपक्षेद्वितीयेकृच्छ्रमाचरेत्-
तृतीयेचैवपक्षेतुकृच्छ्रंसांतपनंचरेत् ॥ ११ ॥ चतुर्थेदशरात्रंस्यात्पराकःपंचमेमतः कु
र्याच्चांद्रायणंषष्ठेसप्तमेत्वैंदवद्वयम् ॥ १२ ॥ शुद्ध्यर्थमष्टमेचैवषण्मासान्कृच्छ्रमाचरेत् प
क्षसंख्याप्रमाणेनसुवर्णान्यपिदक्षिणा ॥ १३ ॥ ऋतुस्नातातुयानारीभर्तारंनोपसर्पति
सामृतानरकंयातिविधवाचपुनःपुनः ॥ १४ ॥ ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति
घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयः ॥ १५ ॥ दरिद्रंव्याधितंधूर्त्तंभर्त्तारंयावमन्यते
साशुनीजायतेमृत्वासूकरीचपुनःपुनः ॥ १६ ॥ पत्यौजीवतियानारीउपोष्यव्रतमाच
रेत् आयुष्यंहरतेभर्तुःसानारीनरकंव्रजेत् ॥ १७ ॥ अपृष्ट्वाचैवभर्त्तारंयानारीकुरुतेव्र
तम् सर्वंतद्राक्षसान्गच्छेदित्येवंमनुरब्रवीत् ॥ १८ ॥ बांधवानांसजातनिांदुर्वृत्तंकुरुतेतु

या गर्भपातचयाकुर्यान्नतांसंभाषयेत्क्वचित् ॥ १९ ॥ यत्पापंब्रह्महत्यायाद्विगुणंगर्भपा
तने प्रायश्चित्तंनतस्यास्तितस्यास्त्यागोविधीयते ॥ २० ॥ नकार्यमावसथ्येननाग्निहो
त्रेणवापुनः सभवेत्कर्मचांडालोयस्तुधर्मपराङ्मुखः ॥ २१ ॥ ओघवाताहृतंवीजंयस्य
क्षेत्रेप्ररोहति सक्षेत्रीलभतेवीजंनवीजीभागमर्हति ॥ २२ ॥ तद्वत्परस्त्रियाःपुत्रौद्वौसु
तौकुंडगोलकौ पत्यौजीवतिकुंडस्तुमृतेभर्तरिगोलकः ॥ २३ ॥ औरसःक्षेत्रजश्चैवदत्तः
कृत्रिमकःसुतः दद्यान्मातापितावायंसपुत्रोदत्तकोभवेत् ॥ २४ ॥ परिवित्तिःपरिवेत्ता
चययाचपरिविद्यते सर्वेतेनरकंयांतिदातृयाजकपंचमाः ॥ २५ ॥ द्वौकृच्छ्रौपरिवित्ते
स्तुकन्यायाःकृच्छ्रएवच कृच्छ्रातिकृच्छ्रौदातुस्तुहोताचांद्रायणंचरेत् ॥ २६ ॥ कुब्ज
वामनषंढेषुगद्गदेषुजडेषुच जात्यंधवधिरेमूकेनदोषःपरिविंदतः ॥ २७ ॥ पितृव्यपुत्रः
सापत्नःपरनारीसुतस्तथा दाराग्निहोत्रसंयोगेनदोषःपरिवेदने ॥ २८ ॥ ज्येष्ठोभ्रा
तायदातिष्ठेदाधानंनैवकारयेत् अनुज्ञातस्तुकुर्वीतशंखस्यवचनंयथा ॥ २९ ॥ नष्टेमृ

प० तेप्रव्रजितेक्लीवेचपतितेपतौ पंचस्वापत्सुनारीणांपतिरन्योविधीयते ३० मृतेभर्तरि
९ यानारीब्रह्मचर्यव्रतेस्थिता सामृतालभतेस्वर्गेयथातेब्रह्मचारिणः॥ ३१ ॥ तिस्रःकोट्यो
र्द्धकोटीचयानिलोमानिमानवे तावत्कालंवसेत्स्वर्गेभर्त्तारंयाऽनुगच्छति ॥ ३२ ॥
व्यालग्राहीयथाव्यालंवलादुद्धरतेविलात् एवंस्त्रीपतिमुद्धृत्यतेनैवसहमोदते ॥ ३३ ॥
इतिपाराशरीयेधर्म्मशास्त्रेउद्बन्धनादिमृतशुद्धिर्न्नामचतुर्थोध्यायः ॥ ४ ॥ वृकश्वानशृ
गालादिदष्टोयस्तुद्विजोत्तमः स्नात्वाजपेत्सगायत्रींपवित्रांवेदमातरम् १ गवांशृंगोदक
स्नानान्महानद्योस्तुसंगमे समुद्रदर्शनाद्वापिशुनादष्टःशुचिर्भवेत् २ वेदविद्याव्रतस्नातः
शुनादष्टोद्विजोयदि सहिरण्योदकैःस्नात्वाघृतंप्राश्यविशुद्धयति ३ सव्रतस्तुशुनादष्टो
यस्त्रिरात्रमुपावसेत् घृतंकुशोदकंपीत्वाव्रतशेषंसमापयेत् ४ अव्रतः सुव्रतोवापिशुनादस्पृ०
ष्टोभवेद्द्विजः प्रणिपत्यभवेत्पूतोविप्रैश्चक्षुर्निरीक्षितः ॥ ५ ॥ शुनाघ्राताऽवलीढस्यनखै ९
र्विलिखितस्यच अद्भिःप्रक्षालनंप्रोक्तमग्निनाचोपचलनम् ६ ब्राह्मणीतुशुनादष्टाजं

वुकेनवृकेणवा उदितंग्रहनक्षत्रंदृष्ट्वासद्यःशुचिर्भवेत् ७ कृष्णपक्षेयदासोमोनदृश्येत
कदाचन यांदिशंव्रजतेसोमस्तांदिशंचाऽवलोकयेत् ८ असद्ब्राह्मणकेग्रामेशुनाद
ष्टोद्विजोत्तमः वृषंप्रदक्षिणीकृत्यसद्यः स्नात्वाशुचिर्भवेत् ९ चंडालेनश्वपाकेनगोभि
र्विप्रैर्हतोयदि आहिताग्निर्हतोविप्रोविषेणात्महतोयदि १० दहेत्तंब्राह्मणंविप्रोलोका
ग्नौमंत्रवर्जितम् स्पृष्ट्वावोढ्वाचदग्ध्वाचसपिंडेषुचसर्वदा ११ प्राजापत्यंचरेत्पश्चाद्वि
प्राणामनुशासनात् दग्ध्वास्थीनिपुनर्गृह्यक्षीरैःप्रक्षालयेद्द्विजः १२ स्वेनाऽग्निना
स्वमंत्रेणपृथगेतत्पुनर्दहेत् आहिताग्निर्द्विजःकश्चित्प्रवसन्कालचोदितः १३ देहना
शमनुप्राप्तःतस्याग्निर्वसतेगृहे प्रेताग्निहोत्रसंस्कारःश्रूयतांमुनिपुंगवाः १४ कृष्णा
जिनंसमास्तीर्यकुशैस्तुपुरुषाकृतिम् षट्शतानिशतंचैवपलाशानांचवृंततः १५ च
त्वारिंशच्छिरेदद्याच्छतंकंठेतुविन्यसेत् वाहुभ्यांदशकंदद्यादंगुलीषुदशैवतु १६
शतंतुजघनेदद्याद्विशतंतूदरेतथा दद्यादष्टौवृषणयोःपंचमेढ्रेतुविन्यसेत् १७ एकविं

प० शतितूरुभ्यांत्रिशतंजानुजंघयोः पादांगुलीषुदद्यात्षट्यज्ञपात्रंततोन्यसेत् १८ घ्राम्यां
१० शिश्नेविनिक्षिप्यअरणींमुष्कयोरपि जुहूंचदाक्षिणेहस्तेवामेतूपभृतंन्यसेत् १९ पृष्ठेतूलू
खलंदद्यात्पृष्ठेचमुशलंन्यसेत् उरसिक्षिप्यदृषदंतंडुलाज्यतिलान्मुखे २० श्रोत्रेचप्रो
क्षणींदद्यादाज्यस्थालींचचक्षुषोः कर्णेनेत्रेमुखेघ्राणेहिरण्यशकलंन्यसेत् २१ अग्नि
होत्रोपकरणमशेषंतत्रविन्यसेत् असौस्वर्गायलोकायस्वाहेत्येकाहुतिंसकृत् २२
दद्यात्पुत्रोथवाभ्राताप्यन्योवापिचवांधवः यथादहनसंस्कारस्तथाकार्यंविचक्षणैः २३
ईदृशंतुविधिंकुर्यात्ब्रह्मलोकगतिःस्मृता दहंतियेद्विजाःतंतुतेयांतिपरमांगतिम् २४
अन्यथाकुर्वतेकर्मत्वात्मवुध्याप्रचोदिताः भवंत्यल्पायुषास्तेवैपतंतिनरकेशुचौ २५
इतिपाराशरीयेधर्मशास्त्रेपंचमोऽध्यायः।५। अतःपरंप्रवक्ष्यामिप्राणिहत्यासुनिष्कृतिम् स्मृ०
पराशरेणपूर्वोक्तांमन्वर्थेपिचाविस्तृताम् १ क्रौंचसारसहंसांश्चचक्रवाकंचकुक्कुटम् जालपा १०
दंचशरभंहत्वाऽहोरात्रतःशुचिः २ वलाकाटिट्टिभौवापिशुकपारावतावपि अटीनवक

घातीचशुद्ध्यतेनक्तभोजनात् ३ वृककाककपोतानांसारीतित्तिरघातकः अंतर्जलउभेसं
ध्येप्राणायामेनशुद्ध्यति ४ गृध्रश्येनशशादीनामुलूकस्यचघातकः अपक्काशीदिनंति
ष्ठेत्त्रिकालंमारुताशनः ५ वल्गुनीटिट्टिभानांचकोकिलाखंजरीटके लाविकारक्तपक्षेषु
शुद्ध्यतेनक्तभोजनात् ६ कारंडवचकोराणांपिंगलाकुररस्यच भारद्वाजादिकंहत्वा
शिवंसंपूज्यशुद्ध्यति ७ भेरुंडचाषभासांश्चपारावतकपिंजलम् पक्षिणांचैवसर्वेषा
महोरात्रमभोजनम् ८ हत्वामूषकमार्जारसर्प्पाऽजगरडुंडुभान् कृसरंभोजयेद्विप्रा
न्लोहदंडंचदक्षिणाम् ९ शिशुमारंतथागोधांहत्वाकूर्मंचशल्लकम् वृंताकफलभक्षी
वाप्यहोरात्रेणशुद्ध्यति १० वृकजंबुकऋक्षश्चतरक्षूणांचघातकः तिलप्रस्थंद्विजेदद्याद्वायु
भक्षोदिनत्रयम् ११ गजस्यचतुरंगस्यमहिषोष्ट्रनिपातने प्रायश्चित्तमहोरात्रंत्रिसंध्यम
वगाहनम् १२ कुरंगंवानरंसिंहंचित्रंव्याघ्रंचघातयन् शुद्ध्यतेसात्रिरात्रेणविप्राणांतर्पणे
नच १३ मृगरोहिवराहाणामवेर्वस्तस्यघातकः अफालकृष्टमश्नीयादहोरात्रमुपोष्य

प० स: १४ एवंचतुष्पदानांचसर्वेषांवनचारिणाम् अहोरात्रोषितस्तिष्ठेज्जपन्वैजातवेद
११ सम् १५ शिल्पिनंकारुकंशूद्रंस्त्रियंवायस्तुघातयेत् प्राजापत्यद्वयंकृत्वावृषैकादश
दक्षिणा १६ वैश्यंवाक्षत्रियंवापिनिर्दोषंयोऽभिघातयेत् सोतिकृच्छ्रद्वयंकुर्याद्गो
विंशद्दक्षिणांददेत् ॥ १७ ॥ वैश्यंशूद्रंक्रियासक्तंविकर्मस्थंद्विजोत्तमम् हत्वाचांद्रा
यणंतस्यत्रिंशद्गाश्चैवदक्षिणा ॥ १८ ॥ चंडालंहतवान्कश्चिद्ब्राह्मणोयदिकंचन प्राजा
पत्यंचरेत्कृच्छ्रंगोद्वयंदक्षिणांददेत् ॥ १९ ॥ क्षात्रियेणापिवैश्येनशूद्रेणैवेतरेणच चां
डालस्यवधेप्राप्तेकृच्छ्रार्द्धेनविशुद्ध्यति ॥ २० ॥ चौरःश्वपाकीचांडालोविप्रेणाभिहतो
यदि अहोरात्रोषितःस्नात्वापंचगव्येनशुद्ध्यति ॥ २१ ॥ श्वपाकंचापिचांडालंविप्रः
संभाषतेयदि द्विजसंभाषणंकुर्यात्सावित्रींचसकृत्जपेत् २२ चांडालैःसहसुप्तंतु स्मृ०
त्रिरात्रमुपवासयेत् चांडालैकपथंगत्वागायत्रीस्मरणाच्छुचिः २३ चांडालदर्शनेसद्य ११
आदित्यमवलोकयेत् चांडालस्पर्शनेचैवसचैलंस्नानमाचरेत् २४ चांडालखातवापीषु

पीत्वासलिलमग्रतः अज्ञानाच्चैकनक्तेनत्वहोरात्रेणशुद्ध्यति २५ चांडालभांडसंस्पृ
ष्ट्वापीत्वाकूपगतंजलम् गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् २६ चांडालघटसं
स्थंतुयत्तोयंपिवतेद्विजः तत्क्षणात्क्षिपतेयस्तुप्राजापत्यंसमाचरेत् २७ यदिनाक्षिपतेतोयं
शरीरेयस्यजीर्यति प्राजापत्यंनदातव्यंकृच्छ्रंसांतपनंचरेत् २८ चरेत्सांतपनंविप्रः
प्राजापत्यमनंतरः तदर्द्धंतुचरेद्वैश्यः पादंशूद्रस्यदापयेत् २९ भांडस्थमंत्यजानां
तुजलंदाधिपयःपिवेत् ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवप्रमादतः ३० ब्रह्मकूर्चोपवासे
नाद्विजातीनांतुनिष्कृतिः शूद्रस्यचोपवासेनतथादानेनशक्तितः ३१ भुंक्तेज्ञानाद्द्विजश्रे
ष्ठःचांडालान्नंकथंचन गोमूत्रयावकाहारोदशरात्रेणशुद्ध्यति ३२ एकैकंग्रासमश्नीयादगो
मूत्रेयावकस्यच दशाहनियमस्थस्यव्रतंतत्तुविनिर्द्दिशेत् ३३ अविज्ञातस्तुचंडालोयत्रवे
श्मनितिष्ठति विज्ञातरूपंसंन्यस्यद्विजाःकुर्युरनुग्रहम् ३४ मुनिवक्रोद्गतान्धर्मान्गायंतो
वेदपारगाः पतंतमुद्धरेयुस्तंधर्मज्ञाःपापसंकटात् ३५ दध्नाचसर्पिषाचैवक्षीरगोमूत्रयाव

भुंजीतसर्पिषा त्र्य
५० कम् भुंजीतसहभृत्यैश्चात्रिसंध्यमवगाहनम् ३६ त्र्यहंभुंजीतदध्नाचत्र्यहंभुंजीतसर्पिषा त्र्य
१२ हंक्षीरेणभुंजीतएकैकेनदिनत्रयम् ३७ भावदुष्टंनभुंजीतनोच्छिष्टंकृमिदूषितम् दाधिक्षी
रस्यत्रिपलंपलमेकंघृतस्यतु ३८ भस्मनातुभवेच्छुद्धिरुभयोःकांस्यताम्रयोः जलशौ
चेनवस्त्राणांपरित्यागेनमृन्मयम् ३९ कुसुंभगुडकार्पासलवणंतैलसर्पिषी द्वारेकृत्वा
तुधान्यानिदद्याद्वेश्मनिपावकम् ४० एवंशुद्धस्ततःपश्चात्कुर्याद्ब्राह्मणतर्पणम् त्रिश
तंगावृषंचैकंदद्याद्विप्रेषुदक्षिणाम् ४१ पुनर्लेपनखातेनहोमजाप्येनशुद्ध्यति आधा
रेणचविप्राणांभूमिदोषोनविद्यते ४२ चांडालैःसहसंपर्कंमासंमासार्द्धमेववा गोमूत्र
यावकाहारोमासार्द्धेनविशुद्ध्यति ४३ रजकीचर्मकारीचलुब्धकीवेणुजीविनी चातुर्वर्ण्य
स्यतुगृहेत्वविज्ञातातुतिष्ठति ४४ ज्ञात्वातुनिष्कृतिंकुर्यात्पूर्वोक्तस्यार्द्धमेवतु गृहदाहंनसं०
कुर्वीतशेषंसर्वंचकारयेत् ४५ गृहस्याभ्यंतरंगच्छेच्चांडालोयदिकस्यचित् तमागारा १२
द्विनिःसार्यमृद्भांडंतुविसर्जयेत् ४६ रसपूर्णंतुमृद्भांडंनत्यजेत्तुकदाचन गोमयेनतु

संमिश्रैर्जलैः प्रोक्षेद्गृहंतथा ४७ ब्राह्मणस्यव्रणद्वारेपूयशोणितसंभवे कृमिरुत्पद्य
तेयस्यप्रायाश्चित्तंकथंभवेत् ४८ गवांमूत्रपुरीषेणदधिक्षीरेणसर्पिषा त्र्यहंस्नात्वाच
पीत्वाचकृमिदष्टःशुचिर्भवेत् ४९ क्षत्रियोपिसुवर्णस्यपंचमाषान्प्रदायतु गोदक्षि
णांतुवैश्यस्याप्युपवासंविनिर्दिशेत् ५० शूद्राणांनोपवासःस्यात्शूद्रोदानेनशुद्ध्यति
अच्छिद्रमितियद्वाक्यंवदंतिक्षितिदेवताः ५१ प्रणम्यशिरसाग्राह्यमग्निष्टोमफलंहितत् ज
पच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्माणि ५२ सर्वंभवतिनिच्छिद्रंब्राह्मणैरुपपादितम् व्याधि
व्यसनिनिश्रांतेदुर्भिक्षेडामरेतथा ५३ उपवासोव्रतंहोमोद्विजसंपादितानिवा अथवाब्रा
ह्मणास्तुष्टः सर्वंकुर्वंत्यनुग्रहम् ५४ सर्वान्कामानवाप्नोतिद्विजसंपादितैरिह दुर्बलेनुग्र
हः प्रोक्तस्तथावैबालवृद्धयोः ५५ ततोऽन्यथाभवेद्दोषस्तस्मान्नानुग्रहःस्मृतः स्नेहाद्वा
यदिवालोभाद्भयादऽज्ञानतोऽपिवा ५६ कुर्वंत्यनुग्रहंयेतुतत्पापंतेषुगच्छति शरीरस्याऽ
त्ययेप्राप्तेवदंतिनियमंतुये ५७ महत्कार्योऽपरोधेचनस्वस्थस्यकदाचन स्वस्थस्यमूढाः

प० कुर्वंतिवदंतिनियमंतुये ५८ तेतस्यविघ्नकर्तारः पतंतिनरकेशुचौ ९ स्वयमेवव्रतंकृत्वा
१३ ब्राह्मणंयोऽवमन्यते ५९ वृथातस्योपवासः स्यान्नसपुण्येनयुज्यते सएवनियमोग्राह्यो
यमेकोपिवदेद्द्विजः ६० कुर्याद्वाक्यंद्विजानांतुअन्यथाभ्रूणहाभवेत् ब्राह्मणाजंगमं तीर्थं
तीर्थभूताहिसाधवः ६१ तेषांवाक्योदकेनैवशुद्ध्यंतिमलिनाजनाः ब्राह्मणायानिभाषंते
मन्यंतेतानिदेवताः ६२ सर्वदेवमयोविप्रोनतद्वचनमन्यथा उपवासोव्रतंचैवस्नानंतीर्थं
जपस्तपः ६३ विप्रैःसंपादितंयस्यसंपूर्णंतस्यतत्फलम् अन्नाद्येकीटसंयुक्तेमाक्षिकाकेश
दूषिते ६४ तदंतरास्पृशेच्चापःतदन्नंभस्मनास्पृशेत् भुंजानश्चैवयोविप्रःपादंहस्तेन
संस्पृशेत् ६५ स्वमुच्छिष्टमसौभुंक्तेयोभुंक्तेभुक्तभाजने पादुकास्थोनभुंजीतनपर्यंकस्थि
तोपिवा ६६ श्वानचांडालदृक्चैवभोजनंपरिवर्जयेत् यदन्नंप्रतिषिद्धंस्यादन्नशुद्धिस्त स्मृ०
थैवच ६७ यथापराशरेणोक्तंतथैवाहंवदामिवः शृतंद्रोणाढकस्यान्नंकाकश्वानोपघाति १३
तम् ६८ केनेदंशुद्ध्यतेचेतिब्राह्मणेभ्योनिवेदयेत काकश्वानाऽवलीढंतुद्रोणान्नंनपरित्यजे

तू ६९ वेदवेदांगविद्विप्रै र्द्धर्मशास्त्रानुपालकैः प्रस्थाद्वात्रिंशतिर्द्रोणाः स्मृतोद्विप्रस्थआढ
कः ७० ततोद्रोणाऽढकस्यान्नंश्रुतिस्मृतिविदोविदुः काकश्वानावलीढंतुगवाघ्रातंखरे-
णवा ७१ स्वल्पमन्नंत्यजेद्विप्रःशुद्धिर्द्रोणाढकेभवेत् अन्नस्योद्धृत्यतन्मात्रंयच्चलालह
तंभवेत् ७२ सुवर्णोदकमभ्युक्ष्यहुताशेनैवतापयेत् हुताशनेनसंस्पृष्टंसुवर्णसलिले-
नच ७३ विप्राणांब्रह्मघोषेणभोज्यंभवतितत्क्षणात् स्नेहोवागोरसोवापितत्रशुद्धिःक-
थंभवेत् ७४ अल्पंपरित्यजेत्तत्रस्नेहस्योत्पवनेनच अनलज्वालयाशुद्धिर्गोरसस्यविधी
यते ७५ इतिपाराशरीयेधर्मशास्त्रेप्राणिहत्यादिनिष्कृतिर्नामषष्ठोऽध्यायः ॥ ६ ॥
अथातोद्रव्यशुद्धिस्तुपराशरवचोयथा दारवाणांतुपात्राणांतत्क्षणाच्छुद्धिरिष्यते १ ॥
मार्जनाद्यज्ञपात्राणांपाणिनायज्ञकर्माणि चमसानांग्रहाणांचशुद्धिःप्रक्षालनेनच २ ॥
चरुणांस्रुक्स्रुवाणांचशुद्धिरुष्णेनवारिणा भस्मनाशुद्ध्यतेकांस्यताम्रमम्लेनशुद्ध्यति
३ रजसाशुद्ध्यतेनारीविकलंयानगच्छति नदीवेगेनशुद्ध्यतेलेपोयदिनदृश्यते ४

५० वापीकूपतडागेषुदूषितेषुकथंचन उद्धृत्यवैकुंभशतंपंचगव्येनशुध्यति ५ अष्टवर्षाभ
१४ वेद्गौरीनववर्षातुरोहिणी दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वला ६ प्राप्तेतुद्वादशेवर्षेयः
कन्यांनप्रयच्छति मासिमासिरजस्तस्याःपिबंतिपितरोनिशम् ७ माताचैवपिताचै.
वज्येष्ठोभ्राताततथैवच त्रयस्तेनरकंयांतिदृष्ट्वाकन्यांरजस्वलां ८ यस्तांसमुद्वहेत्कन्यांब्रा-
ह्मणोमदमोहितः असंभाष्योह्यपांक्तेयःसविप्रोवृषलीपतिः ९ यःकरोत्येकरात्रेणवृष.
लीसेवनंद्विजः सभैक्ष्यभुग्जपन्नित्यंत्रिभिर्वर्षैर्विशुद्ध्यति १० अस्तंगतेयदासूर्येचांडालं
पतितंस्त्रियाम् सूतिकांस्पृशतश्चैवकथंशुद्धिर्विधीयते ११ जातवेदंसुवर्णंचसोममार्गंवि
लोक्यच ब्राह्मणानुमतश्चैवस्नानंकृत्वाविशुद्ध्यति १२ स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणी
ब्राह्मणींतथातावत्तिष्ठेन्निराहारात्रिरात्रेणैवशुद्ध्यति १३ स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणी स्मृ०
क्षत्रियांतथाअर्द्धकृच्छ्रंचरेत्पूर्वापादमेकंत्वऽनंतरा १४ स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणीवैश्य १४
जांतथापादहीनंचरेत्पूर्वापादमेकमनंतरा १५ स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणीशूद्रजांतथा

कृच्छ्रेणशुद्ध्यतेपूर्वाशूद्रादानेनशुद्ध्यति १६ स्नातारजस्वलायातुचतुर्थेहनिशुद्ध्यति कुर्या
द्रजोनिवृत्तौतुदेवपित्र्यादिकर्मच १७ रोगेणयद्रजःस्त्रीणामन्वहंतुप्रवर्त्तते नाऽशुचिःसा
ततःतेनतत्स्याद्वैकालिकंमलम् १८ साध्वाचारानतावत्स्याद्रजोयावत्प्रवर्त्तते रजोनि
वृत्तौगम्यास्त्रीगृहकर्मणिचैवहि १९ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी तृतीयेर
जकीप्रोक्ताचतुर्थेहनिशुद्ध्यति २० आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरः स्नात्वास्ना
त्वास्पृशेदेनंततःशुद्ध्येत्सआतुरः २१ उच्छिष्टोच्छिष्टसंस्पृष्टःशुनाशूद्रेणवापुनः उ
पोष्यरजनीमेकांपंचगव्येनशुद्ध्यति २२ अनुच्छिष्टेनशूद्रेणस्पर्शेस्नानंविधीयते तेनो
च्छिष्टेनसंस्पृष्टः प्राजापत्यंसमाचरेत् २३ भस्मनाशुद्ध्यतेकांस्यंसुरयायन्नलिप्यते सु
रामात्रेणसंस्पृष्टंशुद्ध्यतेऽग्न्युपलेखनैः २४ गवाघ्रातानिकांस्यानिश्वकाकोपहतानिच
शुद्ध्यंतिदशभिःक्षारैःशूद्रोच्छिष्टानियानिच २५ गंडूषंपादशौचंचकृत्वावैकांस्यभाजने
षण्मासान्भुविनिक्षिप्यउद्धृत्यपुनराहरेत् २६ आयसेष्वायसानांचसीसस्याग्नौविशोध

प० नम् दंतमस्थितथाशृंगंरौप्यंसौवर्णभाजनम् २७ मणिपात्राणिशंखश्चेत्येतान्प्र
१५ क्षालयेज्जलैः पाषाणेनतुसंघर्षएषांशुद्धिरुदाहृता २८ मृन्मयेदहनाच्छुद्धिर्धान्यानांमार्ज
नादपि वेणुवल्कलचीराणांक्षौमकार्पासवाससाम् २९ और्णनेत्रपटानांचप्रोक्षणा
च्छुद्धिरिष्यते मुंजोपस्करशूर्पाणांशाणस्यफलचर्मणाम् ३० तृणकाष्ठस्यरज्जूनामुदका
भ्युक्षणंमतम् तूलिकाद्युपधानानिरक्तवस्त्रादिकानिच ३१ शोषयित्वार्कतापेनप्रोक्ष
णाच्छुद्धितामियुः मार्जारमक्षिकाकीटपतंगक्रिमिदर्दुराः ३२ मेध्यामेध्यंस्पृशंतोपिनो
च्छिष्टंमनुरब्रवीत् महींस्पृष्ट्वागतंतोयंयाश्चाप्यन्योन्यविप्रुषः ३३ भुक्तोच्छिष्टंतथास्ने
हंनोच्छिष्टंमनुरब्रवीत् तांबूलेक्षुफलेचैवभुक्तस्नेहानुलेपने ३४ मधुपर्केचसोमेचनोच्छिष्टं
धर्मतोविदुः रथ्याकर्द्दमतोयानिनावःपंथास्तृणानिच ३५ मारुतार्केणशुद्ध्यंतिपक्केष्टक स्मृ०
चितानिच अदुष्टासंतताधारावातोद्धूताश्चरेणवः ३६ स्त्रियोवृद्धाश्चबालाश्चनदुष्यंति १५
कदाचन क्षुतेनिष्ठीवनेचैवदंतोच्छिष्टेतथानृते ३७ पतितानांचसंभाषेदाक्षिणंश्रवणंस्पृ

शेत् अग्निरापश्चवेदाश्चसोमसूर्यानिलास्तथा ३८ एतेसर्वेपिविप्राणांश्रोत्रेतिष्ठतिदं
क्षिणे प्रभासादीनितीर्थानिगंगाद्याःसरितस्तथा ३९ विप्रस्यदक्षिणेकर्णेसान्निध्यंमनुर
ब्रवीत् देशभंगेप्रवासेवाव्याधिषुव्यसनेष्वपि ४० रक्षेदेवस्वदेहादिपश्चाद्धर्मंसमा
चरेत् येनकेनचधर्मेणमृदुनादारुणेनवा ४१ उद्धरेद्दीनमात्मानंसमर्थोधर्ममाचरेत् आ
पत्कालेतुनिस्तीर्णेशौचाऽचारंनचिंतयेत् ४२ शुद्धिंसमुद्धरेत्पश्चात्स्वस्थोधर्मंसमाचरेत्
॥ इतिपाराशरीयेधर्मशास्त्रेद्रव्यशुद्धिर्नामसप्तमोऽध्यायः ॥ ७ ॥ गवांबंधनयोक्रेषुभवे
न्मृत्युरकामतः अकामकृतपापस्यप्रायश्चित्तंकथंभवेत् ॥ १ ॥ वेदवेदांगविदुषांधर्म
शास्त्रंविजानताम् स्वकर्मरतविप्राणांस्वकंपापंनिवेदयेत् ॥ २ ॥ अतऊर्ध्वं
प्रवक्ष्यामिउपस्थानस्यलक्षणम् उपस्थितोहिन्यायेनव्रतादेशनमर्हति ३ सद्योनिः
संशयेपापेनभुंजीतानुपस्थितः भुंजानोवर्द्धयेत्पापंपर्षद्यत्रनविद्यते ४ संशयेतुनभो
क्तव्यंयावत्कर्माविनिश्चयः प्रमादस्तुनकर्तव्योयथैवासंशयस्तथा ५ कृत्वापापंनगूहे

प० नगुह्यमानंविवर्द्धते स्वल्पंवाथप्रभूतंवाधर्मविद्भ्योनिवेदयेत् ६ तेहिपापेकृतेवैद्याहंता
१६ रश्चैवपाप्मनाम् व्याधितस्ययथावैद्यावुद्धिमंतोरुजापहाः ७ प्रायश्चित्तेसमुत्पन्नेह्रीमा
न्सत्त्वपरायणः मुहुरार्जवसंपन्नःशुद्धिंगच्छेतमानवः ८ सचैलोवाग्यतःस्नात्वाक्लिन्नवा-
साःसमाहितः क्षत्रियोवाथवैश्योवाततःपार्षदमाव्रजेत् ९ उपस्थायततःशीघ्रमार्त्तिमा
न्धरणींव्रजेत् गात्रैश्चशिरसाचैवनचकिंचिदुदाहरेत् १० सावित्र्याश्चापिगायत्र्याः
संध्योपास्त्यग्निकार्ययोः अज्ञानात्कृषिकर्त्तारोब्राह्मणानामधारकाः ११ अव्रतानाममं
त्राणांजातिमात्रोपजीविनाम् सहस्रशःसमेतानांपरिषत्त्वंनविद्यते १२ यद्वदंतितमोम
ढामूर्खाधर्ममतद्विदः तत्पापंशतधाभूत्वातद्वक्तॄन्अधिगच्छति १३ अज्ञात्वाधर्मशास्त्रा
णि प्रायश्चित्तंददातियः प्रायश्चित्तीभवेत्पूतःकिल्विषंपर्षदिव्रजेत् १४ चत्वारोवात्रयो स्मृ०
वापियंब्रूयुर्वेदपारगाःसधर्मइतिविज्ञेयोनेतरैस्तुसहस्रशः १५ प्रमाणमार्गंमार्गंतोये १६
धर्मंप्रवदंतिवै तेषामुद्विजतेपापंसद्भूतगुणवादिनाम् १६ यथाश्मनिस्थितंतोयंमा

रुतार्केणशुद्ध्यति तथैवपर्षदादेशात्पापंनश्यतिनान्यथा ॥ १७ ॥ नैवगच्छतिकर्तारंनै
वगच्छातिपर्षदम् मारुतार्कादिसंयोगात्पापंनश्यतितोयवत् ॥ १८ ॥ चत्वारोवात्रयो
वापिवेदवंतोग्निहोत्रिणः ब्राह्मणानांसमर्थायेपरिषत्साविधीयते ॥ १९ ॥ अनाहि
ताग्नयोयेन्येवेदवेदांगपारगाः पंचत्रयोवाधर्मज्ञाःपरिषत्साप्रकीर्तिता ॥ २० ॥
मुनीनामात्मविद्यानांद्विजानांयज्ञयाजिनाम् वेदव्रतेषुस्नातानामेकोपिपारिषद्भवेत् २१
पंचपूर्वमयाप्रोक्तास्तेषांचासंभवेत्त्रयः स्ववृत्तिपरितुष्टायेपारिषत्साप्रकीर्तिता ॥ २२ ॥
अतऊर्ध्वंतुयेविप्राःकेवलंनामधारकाः॥ परिषत्त्वंनतेष्वास्तिसहस्रगुणितेष्वपि ॥ २३ ॥
यथाकाष्ठमयोहस्तीयथाचर्ममयोमृगः ब्राह्मणस्त्वनधीयानस्त्रयस्तेनामधारकाः २४
ग्रामस्थानंयथाशून्यंयथाकूपस्तुनिर्जलः यथाहुतमनग्नौचअमंत्रोब्राह्मणस्तथा २५
यथाषंढोफलःस्त्रीषुयथागौरुषराफला यथाचाज्ञेफलंदानंतथाविप्रोऽनृचोऽफलः २६
चित्रकर्मयथानेकैरंगैरुन्मीलयतेशनैः ब्राह्मण्यमपितद्वद्धिसंस्कारैर्मंत्रपूर्वकैः ॥ २७ ॥

प० प्रायश्चित्तंप्रयच्छंतियेद्विजानामधारकाः तेद्विजाःपापकर्माणः समेतानरकंययुः ॥ २८
१७ येपठंतिद्विजावेदंपंचयज्ञरताश्चये त्रैलोक्यंतारयंत्येवपंचेंद्रियरताअपि॥२९॥ संप्रणी
तःश्मशानेषुदीप्तोग्निः सर्वभक्षकः तथाचवेदविद्विप्रःसर्वभक्षोऽपिदैवतम् ३० अमेध्या
नितुसर्वाणिप्रक्षिप्यंतेयथोदके तथैवाकिल्विषंसर्वंप्राक्षिपेच्चद्विजानले ॥ ३१ ॥ गायत्रीर
हितोविप्रःशूद्रादप्यशुचिर्भवेत् गायत्रीब्रह्मतत्त्वज्ञाःसंपूज्यंतेजनैर्द्विजाः ॥ ३२ ॥
दुःशीलोपिद्विजः पूज्योनतुशूद्रोजितेंद्रियः कःपरित्यज्यगांदुष्टांदुहेच्छीलवतींखरीम्
३३ ॥ धर्मशास्त्ररथारूढावेदखड्गधराद्विजाः क्रीडार्थमपियंब्रूयुःसधर्मःपरमःस्मृतः
३४ ॥ चातुर्वैद्योविकल्पीचअंगाविद्धर्मपाठकः त्रयश्चाश्रमिणोमुख्याःपर्षदेषादशावरा
३५ ॥ राज्ञश्चानुमतेस्थित्वाप्रायश्चित्तंविनिर्दिशेत् स्वयमेवनकर्त्तव्यंकर्तव्यास्वल्पनि स्मृ०
ष्कृतिः॥ ३६ ॥ ब्राह्मणांस्ताननतिक्रम्यराजाकर्तुंयदीच्छति तत्पापंशतधाभूत्वाराजानम १७
नुगच्छति ॥ ३७ ॥ प्रायश्चित्तंसदादद्याद्देवतायतनाग्रतः आत्मकृच्छ्रंततः कृत्वाजपेद्वै वे

दमातरम् ॥ ३८ ॥ सशिखंवपनंकृत्वात्रिसंध्यमवगाहनम् गवांमध्येवसेद्रात्रौदिवा
गाश्चाप्यनुव्रजेत् ॥ ३९ ॥ उष्णेवर्षतिशीतेवामारुतेवातिवाभृशम् नकुर्वीतात्मनस्त्रा
णंगोरकृत्वातुशक्तितः ॥ ४० ॥ आत्मनोयादिवाऽन्येषांगृहेक्षेत्रेथवाखले भक्षयंतींनक
थयेत्पिवंतंचैववत्सकम् ॥ ४१ ॥ पिवंतीषुपिवेत्तोयंसंविशंतीषुसंविशेत् पतितांपंकल
ग्नांवासर्वप्राणैःसमुद्धरेत् ॥ ४२ ॥ ब्राह्मणार्थेगवार्थेवायस्तुप्राणान्परित्यजेत् मुच्य
तेब्रह्महत्यायागोप्तागोब्राह्मणस्यच ॥ ४३ ॥ गोवधस्यानुरूपेणप्राजापत्यंविनिर्दिशेत्
प्राजापत्यंततः कृच्छ्रंविभजेतचतुर्विधम् ॥ ४४ ॥ एकाहमेकभक्ताशीएकाहंनक्तभोजनः
अयाचितात्वेकमहरेकाहंमारुताशनः ॥ ४५ ॥ दिनद्वयंचैकभक्तोद्विदिनंनक्तभोजनः
दिनद्वयमयाचीस्याद्विदिनंमारुताऽशनः ॥ ४६ ॥ त्रिदिनंचैकभक्ताशीत्रिदिनंनक्तभो
जनः दिनत्रयमयाचीस्यात्त्रिदिनंमारुताशनः ॥ ४७ ॥ चतुरहंत्वेकभक्ताशीचतुरहंन
क्तभोजनः चतुर्दिनमयाचीस्याच्चतुरहंमारुताशनः ॥ ४८ ॥ प्रायश्चित्तेततस्तीर्णेकुर्या

प० द्ब्राह्मणभोजनम् विप्राणांदक्षिणांदद्यात्पवित्राणिजपेद्द्विजः ॥ ४१ ॥ ब्राह्मणा
१८ न्भोजयित्वातुगोघ्नःशुद्ध्यन्नसंशयः ॥ इतिपाराशरीयेधर्मशास्त्रेष्टमोध्यायः ॥ ८ ॥
गवांसंरक्षणार्थायनदुष्येद्रोधवधयोः तद्वधंतुनतंविद्यात्कामाकामकृतंतथा १ दंडादूर्ध्व
यदान्येनप्रहारद्यदिपातयेत् प्रायश्चित्तंतदाप्रोक्तंद्विगुणंगोवधेचरेत् ॥ २ ॥ रो
धवंधनयोक्राणिघातश्चेतिचतुर्विधम् एकपादंचरेद्रोधेद्वौपादौवंधनेचरेत् ॥ ३ ॥ योक्रेषु
तुत्रिपादंस्याच्चरेत्सर्वंनिपातने गोवाटेवागृहेवापिदुर्गेष्वथसमस्थले ॥ ४ ॥ नदीष्वथ
समुद्रेषुत्वन्येषुचनदीमुखे दग्धदेशेमृतागावःस्तंभनाद्रोधउच्यते ॥ ५ ॥ योक्रदामक
दोरैश्चकंठाभरणभूषणैः गृहेचापिवनेवापिवद्धःस्याद्गौर्मृतोयदि ॥ ६ ॥ तदेववंधनंवि
द्यात्कामाकामकृतंचयत् हलेवाशकटेपंक्तौपृष्ठेवापीडितोनरैः ॥ ७ ॥ गोप स्मृ०
तिर्मृत्युमाप्नोतियोक्रोभवतितद्वधः मत्तःप्रमत्तउन्मत्तश्चेतनोवाऽप्यचेतनः ॥ ८ ॥ का १८
माकामकृतक्रोधोदंडैर्हन्यादथोपलैः प्रहृतावामृतावापिताद्धिहेतुर्निपातने ९ अंगुष्ठमा

त्रंरुथूलस्तुवाहुमात्रंप्रमाणतः आर्द्रस्तुसपलाशश्चदंडइत्यभिधीयते १० मूर्छितःपतितो
वापिदंडेनाभिहतःसतु उत्थितस्तुयदागच्छेत्पंचसप्तदशाथवा ॥ ११ ॥ ग्रासंवायदिगृ
ह्णीयात्तोयंवापिपिवेद्यदि पूर्वंव्याध्युपसृष्टश्चेत्प्रायश्चित्तंनविद्यते ॥ १२ ॥ पिंडस्थेपा
दमेकं तुद्वौपादौगर्भसंमिते पादोनंव्रतमुद्दिष्टंहत्वागर्भमचेतनम् ॥ १३ ॥ पादेंगरोम
वपनंद्विपादेश्मश्रुणोपिच त्रिपादेतुशिखावर्ज्जंसशिखंतुनिपातने ॥ १४ ॥ पादेवस्त्रयु
गंचैवद्विपादेकांस्यभाजनम् त्रिपादेगोवृषंदद्याच्चतुर्थेगोद्वयंस्मृतम् ॥ १५ ॥ निष्प
न्नसर्वगात्रस्तुदृश्यतेवासचेतनः अंगप्रत्यंगसंपूर्णोद्विगुणंगोव्रतंचरेत् ॥ १६ ॥ पाषाणे
नैवदंडेनगावोयेनाभिघातिताः शृंगभंगेचरेत्पादंद्वौपादौनेत्रघातने ॥ १७ ॥ लांगूले
पादकृच्छ्रंतुद्वौपादावस्थिभंजने त्रिपादंचैवकर्णेतुचरेत्सर्वंनिपातने ॥ १८ ॥ शृंगभंगे
ऽस्थिभंगेचकटिभंगेतथैवच यदिजीवतिषण्मासान्प्रायश्चित्तंनविद्यते ॥ १९ ॥ व्रणभं
गेचकर्त्तव्यःस्नेहाभ्यंगस्तुपाणिना यवसश्चोपहर्त्तव्योयावत्दृढवलोभवेत् ॥ २० ॥ याव

प० त्संपूर्णसर्वांगःस्तावत्तंपोषयेन्नरः गोरूपंब्राह्मणस्याग्रेनमस्कृत्वाविसर्जयेत् २१ ॥ स
११ द्यःसंपूर्णसर्वांगोहीनदेहीभवेत्तदा गोघातकस्यतस्यार्द्धंप्रायश्चित्तंविनिर्दिशेत् २२ का
ष्टलोष्टकपाषाणैःशस्त्रेणैवोद्धतोवलात् व्यापादयतियोगांतुतस्यशुद्धिंविनिर्दिशेत् २३
चरेत्सांतपनंकाष्टेप्राजापत्यंतुलोष्टके तप्तकृच्छ्रंतुपाषाणेशस्त्रेणैवातिकृच्छ्रकम् २४ पंच
सांतपनेगावःप्राजापत्येतथात्रयः तप्तकृच्छ्रेभवंत्यष्टावतिकृच्छ्रेत्रयोदश ॥ २५ ॥ प्रमा
पणेप्राणभृतांदद्यात्तत्प्रतिरूपकम् तस्यानुरूपंमूल्यंवादद्यादित्यब्रवीन्मनुः ॥ २६ अ
न्यत्रांकनलक्ष्याभ्यांवाहनेमोचनेतथा सायंसंगोपनार्थंचनदुष्येद्रोधवंधयोः ॥ २७ ॥
अतिदाहेतिवाहेचनासिकाभेदनेतथा नदीपर्वतसंचारेप्रायाश्चित्तंविनिार्दिशेत् ॥ २८ ॥
अतिदाहेचरेत्पादंद्वौपादौवाहनेचरेत् नासिक्येपादहीनंतुचरेत्सर्वंनिपातने ॥ २९ दह स्मृ०
नात्तुविपद्येतअनडुान्योक्त्रयंत्रितः उक्तंपराशरेनैवह्येकंपादंयथाविधि ॥ ३० ॥ रोधनं १९
वंधनंचैवभारप्रहरणंतथा दुर्गप्रेरणयोक्त्रंचानिमित्तानिवधस्यषट् ॥ ३१ ॥ वंधपाशसु

गुप्तांगोम्रियतेयदिगोपशुः भुवनेतस्यपापीस्यात्प्रायश्चित्तार्द्धमर्हति ॥ ३२ ॥ ननारिकेलैर्नचशाणवालैर्नचापिमौंजैर्नचवल्कशृंखलैः एतैस्तुगावोननिवंधनीयावध्वातुतिष्ठेत्परशुंगृहीत्वा ३३ कुशैःकाशैश्चवध्नीयाद्गोपशुंदक्षिणामुखम् पाशलग्नाग्निदग्धेषुप्रायश्चित्तंनविद्यते ३४ यदितत्रभवेत्काष्टंप्रायश्चित्तंकथंभवेत् जापित्वापावनींदेवींमुच्यतेतत्रकिल्विषात् ३५ प्रेरयन्कूपवापीषुवृक्षच्छेदेषुपातयन् गवाशनेषुविक्रीणंस्ततःप्राप्नोतिगोवधम् ३६ आराधितस्तुयःकश्चिद्भिन्नकक्षोयदाभवेत् श्रवणंहृदयंभिन्नंमग्नोवाकूपसंकटे ३७ कूपादुत्क्रमणेचैवभग्नोवाग्रीवपादयोः सएवम्रियेततत्रत्रीन्पादांस्तुसमाचरेत् ३८ कूपखातेतटावंधेनदीवंधेप्रपासुच पानीयेषुविपन्नानांप्रायाश्चित्तंनविद्यते ३९ कूपखातेतटाखातेदीर्घखातेतथैवच स्वल्पेषुधर्मखातेषुप्रायश्चित्तंनविद्यते ४० वेश्मद्वारेनिवासेषुयोनरःखातुमिच्छति स्वकार्यगृहखातेषुप्रायश्चित्तंविनिर्दिशेत् ४१ निशिवंधनिरुद्धेषुसर्पव्याघ्रहतेषुच अग्निविद्युद्विपन्नेषुप्रायाश्चित्तंनविद्यते

अतिवृष्टिहतानांचप्रायश्चित्तंनविद्यते ४३
प० ४२ ग्रामघातेशरौघेणवेश्मभंगान्निपातने अतिवृष्टिहतानांचप्रायश्चित्तंनविद्यते ४४ यं
२० संग्रामेप्रहतानांचयेदग्धावेश्मकेषुच दावाग्निग्रामघातेषुप्रायश्चित्तंनविद्यते ४५ व्या
त्रितागौश्चिकित्सार्थंगूढगर्भविमोचने यत्नेकृतेविपद्येतप्रायश्चित्तंनविद्यते ४५ व्या
पन्नानांवहूनांचरोधनेवंधनेपिवा भिषङ्मिथ्योपचारेणप्रायश्चित्तंविनिर्दिशेत् ४६ गो
वृषाणांविपत्तौचयावंतःप्रेषकाजनाः अनिवारयतांतेषांसर्वेषांपातकंभवेत् ४७ ए
कोहतोयैर्वहुभिःसमेतैर्नज्ञायतेयस्यहतोभिघातात् दिव्येनतेषामुपलभ्यहंतानिवर्त्त
नीयोनृपसन्नियुक्तैः ४८ एकाचेद्बहुभिःकाचिद्दैवाद्व्यापादिताक्वचित् पादंपादंतुहत्या
याश्चरेयुस्तपृथक्पृथक् ४९ हतेतुरुधिरंदृश्यंव्याधिग्रस्तःकृशोभवेत् लालाभवातिद
ष्टेषुएवमन्वेषणंभवेत् ५० ग्रासार्थंचोदितोवापिअध्वानंनैवगच्छति मनुनाचैवमेके- स्मृ०
नसर्वशास्त्राणिजानता ५१ प्रायश्चित्तंतुतेनोक्तंगोघ्नंचांद्रायणंचरेत् केशानांरक्षणा २०
र्थायद्विगुणंव्रतमाचरेत् ५२ द्विगुणेव्रतआदिष्टेदक्षिणाद्विगुणाभवेत् राजावाराजपुत्रो

वाब्राह्मणोवावहुश्रुतः ५३ अकृत्वावपनंतेषांप्रायश्चित्तंविनिर्द्दिशेत् यस्यनद्विगुणंदा
नंकेशांश्चपरिरक्षतः ५४ तत्पापंतस्यतिष्ठेतत्यक्त्वाचनरकंव्रजेत् यत्किंचित्क्रियतेपापं
सर्वंकेशेषुतिष्ठति ५५ सर्वान्केशान्समुद्धृत्यछेदयेदंगुलिद्वयम् एवंनारीकुमारीणांशि
रसोमुंडनंस्मृतम् ५६ नस्त्रियाःकेशवपनंनदूरेशयनासनम् नचगोष्ठेवसेद्रात्रौनदिवा
गाअनुव्रजेत् ५७ नदीषुसंगमेचैवअरण्येषुविशेषतःनस्त्रीणामजिनंवासोव्रतमेवसमा
चरेत् ५८ त्रिसंध्यंस्नानमित्युक्तंसुराणामर्च्चनंतथा वंधुमध्येव्रतंतासांकृछ्चांद्रायणादिक
म् ५९ गृहेषुसततंतिष्ठेच्छुचिर्नियममाचरेत् इहयोगोवधंकृत्वाप्रच्छादयितुमिच्छति६०
सयातिनरकंघोरंकालसूत्रमसंशयम् विमुक्तोनरकात्तस्मान्मर्त्यलोकेप्रजायते ६१ क्लीवो
दुःखीचकुष्टीचसप्तजन्मानिवैनरः तस्मात्प्रकाशयेत्पापंस्वधर्म्मंसततंचरेत् ६२ स्त्रीवाल
भृत्यगोविप्रेष्वतिकोपंविवर्ज्जयेत् इतिपाराशरीयेधर्मशास्त्रेगोरक्षणार्थंगोविपत्तिप्राय
श्चित्तंनामनवमोऽध्यायः ॥ ९ ॥ चातुर्वर्ण्येषुसर्वेषुहितांवक्ष्यामिनिष्कृतिम् अगम्या

प० गमनेचैवशुद्ध्यौचांद्रायणंचरेत् १ एकैकंह्रासयेद्ग्रासंकृष्णेशुक्लेचवर्द्धयेत् अमावास्यांनभु
२१ जीतह्येषचांद्रायणोविधिः २ कुक्कटांडप्रमाणंतुग्रासंवैपरिकल्पयेत् अन्यथाजातदोषे
णनधर्मोनचशुद्ध्यते ३ प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनम् गोद्वयंवस्त्रयुग्मंचदद्या
द्विप्रेषुदक्षिणाम् ४ चांडालींवाश्वपाकींवाअनुगच्छतियोद्विजः ॥ त्रिरात्रमुपवासि
त्वाविप्राणामनुशासनात् ५ सशिखंवपनंकृत्वाप्राजापत्यद्वयंचरेत् ब्रह्मकूर्चंततःकृ-
त्वाकुर्याद्ब्राह्मणतर्पणम् ६ गायत्रींचजपेन्नित्यंदद्याद्गोमिथुनद्वयम् विप्रायदक्षिणांदद्या-
च्छुद्धिमाप्नोत्यसंशयम् ७ गोद्वयंदक्षिणांदद्याच्छुद्धिंपाराशरोब्रवीत् क्षत्रियोवाथवैश्योवा
चांडालींगच्छतोपिवा ८ प्राजापत्यद्वयंकुर्याद्दद्याद्गोमिथुनद्वयम् श्वपाकींवाथचांडालीं
शूद्रोवायदिगच्छति ९ प्राजापत्यंचरेत्कृच्छ्रंचतुर्गोमिथुनंददेत् मातरंयदिगच्छेत्तुभगि स्मृ०
नींस्वसुतांतथा १० एतास्तुमोहितोगत्वाकृच्छ्राणित्रीणिसंचरेत् चांद्रायणत्रयंकुर्याच्छि २१
श्नच्छेदेनशुद्ध्यति ११ मातृस्वसृगमेचैवआत्ममेढ्रनिकृंतनम् अज्ञानेनतुयोगच्छेत्कुर्या

चांद्रायणत्रयम् ॥ १२ ॥ दशगोमिथुनंदद्याच्छुद्धिंपाराशरोऽब्रवीत् ॥ पितृ
दारान्समारुह्यमातुराप्तांचभ्रातृजाम् १३ गुरुपत्नींस्नुषांचैवभ्रातृभार्यांतथैवच मातुला
नींसगोत्रांचप्राजापत्यत्रयंचरेत् १४ गोद्वयंदक्षिणांदत्त्वामुच्यतेनात्रसंशयः पशुवे
श्यादिगमनेमहिष्युष्ट्रीकपीस्तथा १५ खरींचसूकरींगत्वाप्राजापत्यंसमाचरेत् गोगा
मीचत्रिरात्रेणगामेकांब्राह्मणेददेत् १६ महिष्युष्ट्रीखरीगामीत्वहोरात्रेणशुद्ध्यति अमरेस
मरेवापिदुर्भिक्षेवाजनक्षये १७ वंदिग्राहेभयार्तांवासदास्वस्त्रींनिरीक्षयेत् चांडालैःसहसं
पर्कंयानारीकुरुतेततः ॥ १८ ॥ विप्रान्दशवरान्कृत्वास्वयंदोषंप्रकाशयेत् आकंठसंमिते
कूपेगोमयोदककर्दमे ॥ १९ ॥ तत्रस्थित्वानिराहारात्वहोरात्रेणनिष्क्रमेत् सशिखंवप
नंकृत्वाभुंजीयाद्यावकौदनम् २० त्रिरात्रमुपवासित्वात्वेकरात्रंजलेवसेत् शंखपुष्पील
तामूलंपत्रंवाकुसुमंफलम् २१ सुवर्णंपंचगव्यंचक्वाथयित्वापिवेज्जलम् एकभक्तंचरेत्प
श्चाद्यावत्पुष्पवतीभवेत् २२ व्रतंचरतितद्यावत्तावत्संवसतेवहिः प्रायश्चित्तेततश्चीर्णे

चातुर्वर्ण्यस्य
प० कुर्याद्ब्राह्मणभोजनम् ॥ २३ ॥ गोद्वयंदक्षिणांदद्याच्छुद्धिंपाराशरोऽब्रवीत् चातुर्वर्ण्यस्य
२२ नारीणांकृच्छ्रंचांद्रायणंव्रतम् ॥ २४ ॥ यथाभूमिस्तथानारीतस्मात्तांनतुदूषयेत् वं
दिग्राहेणयाभुक्ताहत्वाबद्ध्वावलाद्भयात् ॥ २५ ॥ कृत्वासांतपनंकृच्छ्रंशुद्ध्येत्पाराशरोऽब्र
वीत् ॥ सकृद्भुक्तातुयानारीनेच्छंतीपापकर्मभिः ॥ २६ ॥ प्राजापत्येनशु
ध्येतऋतुप्रस्रवणेनच पतत्यर्द्धंशरीरस्ययस्यभार्यासुरांपिबेत् ॥ २७ ॥ पतितार्द्धश
रीरस्यनिष्कृतिर्नविधीयते गायत्रींजपमानस्तुकृच्छ्रंसांतपनंचरेत् ॥ २८ ॥ गोमूत्रंगो
मयंक्षीरंदधिसर्पिःकुशोदकम् एकरात्रोपवासश्चकृच्छ्रंसांतपनंस्मृतम् ॥ २९ ॥ जारेण
जनयेद्गर्भंमृतेत्यक्तेगतेपतौ तांत्यजेदपरेराष्ट्रेपतितांपापकारिणीम् ॥ ३० ॥ ब्राह्मणीतु
यदागच्छेत्परपुंसासमन्विता सातुनष्टाविनिर्दिष्टानतस्यागमनंपुनः ३१ कामान्मोहा स्मृ०
द्वयागच्छेत्त्यक्त्वाबंधून्सुतान्पतिम् साऽपिनष्टापरेलोकेमानुषेषुविशेषतः ॥ ३२ ॥ २२
मदमोहगतानारीक्रोधाद्दंडादिताडिता अद्वितीयगताचैवपुनरागमनंभवेत् ॥ ३३ ॥

दशमेतुदिनेप्राप्तेप्रायश्चित्तंनविद्यते दशाहंनत्यजेन्नारींत्यजन्नष्टस्तुतांतथा ३४ भर्त्ता
चैवचरेत्कृच्छ्रंकृच्छ्रार्द्धंचैववांधवाः तेषांभुक्त्वाचपत्वाचअहोरात्रेणशुद्ध्यति ॥ ३५ ॥
व्राह्मणीतुयदागच्छेत्परपुंसाविवर्जिता गत्वापुंसांशतंयातित्यजेयुस्तांतुगोत्रिणः ॥ ३६
पुंसोयदिगृहंगच्छेत्तदाशुद्धंगृहंभवेत् पितृमातृगृहंयच्चजारस्यैवतुतद्गृहम् ॥ ३७ ॥
उल्लिख्यतद्गृहंपश्चात्पंचगव्येनशोधयेत् ॥ त्यजेच्चमृन्मयंपात्रंवस्त्रंकाष्ठंचशोधयेत् ॥
॥३८॥संभारांच्छोधयेत्सर्वान्गोवालैश्चफलोद्भवान् ताम्राणिपंचगव्येनकांस्यानिदशभ
स्मभिः ॥ ३९ ॥ प्रायश्चित्तंचरेद्विप्रोव्राह्मणैरुपपादयेत् गोद्वयंदक्षिणांदद्यात्प्राजाप
त्यद्वयंचरेत् ४० इतरेषामहोरात्रंपंचगव्यंचशोधनम् उपवासैर्व्रतैःपुण्यैःस्नानसं
ध्यार्चनादिभिः ४१ जपहोमदयादानैःशुद्ध्यंतेव्राह्मणादयः आकाशंवायुरग्निश्चमेध्यंभू
मिगतंजलम् ४२ नदुष्यंतिचदर्भाश्चयज्ञेषुचमसायथा इतिपाराशरेधर्मशास्त्रेदशमो-
ध्यायः १० अमेध्यरेतोगोमांसंचांडालान्नमथापिवा यदिभुक्तंतुविप्रेणकृच्छ्रंचांद्रायणं-

प० चरेत् १ तथैवक्षत्रियोवैश्योप्यर्द्धंचांद्रायणंचरेत् शूद्रोऽप्येवंयदाभुंक्तेप्राजापत्यंसमा
२३ चरेत् २ पंचगव्यंपिवेच्छूद्रोब्रह्मकूर्चंपिवेद्द्विजः एकद्वित्रिचतुर्गांवोदद्याद्विप्राद्यनुक्रमात्
३ शूद्रान्नंसूतकान्नंचअभोज्यस्यान्नमेवच शंकितंप्रतिषिद्धानांपूर्वोच्छिष्टंतथैवच ४ यदि.
भुक्तंतुविप्रेणअज्ञानादापदापिवा ज्ञात्वासमाचरेत्कृच्छ्रंब्रह्मकूर्चंतुपावनम् ५ व्यालै-
र्नकुलमार्जारैरन्नमुच्छिष्टितंयदा तिलदर्भोदकैःप्रोक्ष्य शुद्ध्यतेनात्रसंशयः ६ शूद्रोप्यभो
ज्यंभुक्त्वान्नंपंचगव्येनशुद्ध्यति क्षत्रियोवापिवैश्यश्चप्राजापत्येनशुद्ध्यति ७ एकपंक्त्युप
विष्टानांविप्राणांसहभोजने यद्येकोपित्यजेत्पात्रंशेषमन्नंनभोजयेत् ८ मोहाद्भुंजीतयस्त
त्रपंक्तावुच्छिष्टभोजने प्रायश्चित्तंचरेद्विप्रः कृच्छ्रंसांतपनंतथा ९ पीयूषंश्वेतलशुनंवृंता
कफलगृंजनम् पलांडुंवृक्षनिर्यासान्देवस्वंकवकानिच १० उष्ट्रीक्षीरमवीक्षीरमज्ञाना स्मृ०
द्भुंजतेद्विजः त्रिरात्रमुपवासेनपंचगव्येनशुद्ध्यति ११ मंडूकंभक्षयित्वातुमूषिकामांस २३
मेवच ज्ञात्वाविप्रस्त्वहोरात्रंयावकान्नेनशुद्ध्यति १२ क्षत्रियश्चापिवैश्यश्चक्रियावंतो

शुचिव्रतौ तद्गृहेतुद्विजैर्भोज्यंहव्यकव्येषुनित्यशः १३ घृतंक्षीरंतथातैलंगुडंस्नेहेनपा
चितं गत्वानदीतटेविप्रोभुंजीयाच्छूद्रभोजनम् १४ मद्यमासरतंनित्यंनीचकर्मप्रव
र्त्तकम् तंशूद्रंवर्ज्जयेद्विप्रःश्वपाकमिवदूरतः १५ द्विजशुश्रूषणारतान्मद्यमांसविवर्ज्जि
तान् स्वकर्मनिरतान्नित्यंतांच्छूद्रान्नत्यजेद्द्विजः १६ अज्ञानाद्भुंजतेविप्राःसूतकेमृत
केपिवा प्रायश्चित्तंकथंतेषांवर्णेवर्णोविनिर्दिशेत् १७ गायत्र्यऽष्टसहस्रेणशुद्धिःस्या
च्छूद्रसूतके वैश्येपंचसहस्रेणत्रिसहस्रेणक्षत्रिये १८ ब्राह्मणस्ययदाभुंक्तेद्वेसहस्रे
तुदापयेत् अथवावामदेव्येनसाम्नाचैकेनशुध्यति १९ शुष्कान्नंगोरसंस्नेहंशूद्रवेश्म
नआहृतम् पक्वंविप्रगृहेभुक्तंभोज्यंतन्मनुरब्रवीत् २० आपत्कालेतुविप्रेणभुक्तंशूद्रगृ
हेयदि मनस्तापेनशुध्येतद्रुपदांवासकृज्जपेत् २१ दासनापितगोपालकुलमित्रार्द्ध
सीरिणः एतेशूद्रेषुभोज्यान्नायश्चात्मानंनिवेदयेत् २२ शूद्रकन्यासमुत्पन्नोब्राह्मणेन
तुसंस्कृतः ॥ असंस्काराद्भवेद्दासःसंस्कारादेवनापितः ॥ २३ ॥ क्षत्रियाच्छूद्रकन्या

सगोपालइतिख्यातोभोज्योविप्रैर्नसंशयः ॥ २४ ॥ वैश्य
प० यांसमुत्पन्नस्तुयःसुतः ॥ सगोपालइतिख्यातोभोज्योविप्रैर्नसंशयः ॥ २५ ॥
२४ कन्यासमुद्भूतोब्राह्मणेनतुसंस्कृतः सोह्यार्द्धिकइतिज्ञेयोभोज्योविप्रैर्नसंशयः ॥ २५ ॥
भांडस्थितमभोज्यानांजलंदधिघृतंपयः अकामतस्तुयोभुंक्तेप्रायाश्चित्तंकथंभवेत् २६
ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाउपसर्पति ब्रह्मकूर्चोपवासेनयोज्यावर्णस्यानिष्कृतिः २७
शूद्राणांनोपवासःस्याच्छूद्रोदानेनशुध्यति ब्रह्मकूर्चमहोरात्रंश्वपाकमपिशोधयेत् २८
गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् निर्दिष्टंपंचगव्यंचपवित्रंपापशोधनम् २९ ॥
गोमूत्रंकृष्णवर्णायाः श्वेतायाश्चैवगोमयम् पयश्चताम्रवर्णायारक्तायागृह्यतेदधि ३०
कपिलायाघृतंग्राह्यंसर्वंकापिलमेववा मूत्रमेकपलंदद्यादंगुष्ठार्द्धंतुगोमयम् ३१ क्षीरं
सप्तपलंदद्याद्दधित्रिपलमुच्यते घृतमेकपलंदद्यात्पलमेकंकुशोदकम् ३२ गायत्र्या स्मृ०
दायगोमूत्रंगंधद्वारेतिगोमयम् आप्यायस्वेतिचक्षीरंदधिक्राब्णस्तथादधि ३३ तेजो- २४
सिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकम् पंचगव्यमृचापूतंस्थापयेदग्निसन्निधौ ३४ आ

पोहिष्ठातिचालोड्यमानस्तोकेतिमंथयेत् सप्तवारास्तुयेदर्भाअच्छिन्नाग्राःशुकत्विषः ३५
एतैरुद्धृत्यहोतव्यंपंचगव्यंयथाविधि इरावतीइदंविष्णुर्मानस्तोकेचशंवती ३६ एताभि
श्चैवहोतव्यंहुतशेषंपिवेद्द्विजः आलोड्यप्रणवेनैवानिर्मथ्यप्रणवेनतु ३७ उद्धृत्यप्रणवेनै
वपिवेच्च प्रणवेनतु यत्त्वगस्थिगतंपापंदेहेतिष्ठतिदेहिनाम् ३८ ब्रह्मकूर्चंदहेत्सर्वंयथैवाग्नि
रिवेन्धनम् पवित्रंत्रिषुलोकेषुदेवताभिरधिष्ठितम् ३९ वरुणश्चैवगोमूत्रेगोमयेहव्यवा
हनः दध्निवायुःसमुद्दिष्टःसोमःक्षीरेघृतेरविः ४० पिवतःपतितंतोयंभाजनेमुखनिः
सृतम् अपेयंतद्द्विजानीयाद्भुक्त्वाचांद्रायणंचरेत् ४१ कूपेचपतितंदृष्ट्वाश्वसृगालौ
श्चमर्कटम् अस्थिचर्मादिपतितंपत्वामेध्याअपोद्विजः ४२ नारंतुकुणपंकाकंविड्व
राहंखरोष्ट्रकम् गावयंसौप्रतीकंचमायूरंखड्गकंतथा ४३ वैयाघ्रमार्क्षंसैहंवाकूपेयादि
निमज्जति तडागस्याऽथदुष्टस्यपीतंस्यादुदकंयदि ४४ प्रायश्चित्तंभवेत्पुंसः क्रमेणैते
नसर्वशः विप्रःशुद्ध्येत्त्रिरात्रेणक्षत्रियस्तुदिनद्वयात् ४५ एकाहेनतुवैश्यस्तुशूद्रोनक्तं

प० नशुद्ध्यति परपाकनिवृत्तस्यपरपाकरतस्यच ॥ ४६ अपचस्यचभुक्त्वान्नंद्विजश्चांद्रा
२९ यणंचरेत् अपचस्यतुयद्दानंदातुरस्यकुतः फलम् ४७ दाताप्रतिगृहीताचद्वौतौनिर
यगामिनौ गृहीत्वाग्निंसमारोप्यपंचयज्ञान्निर्वपेत् ॥ ४८ ॥ परपाकनिवृत्तोसौमुनि
भिःपरिकीर्तितः पंचयज्ञान्स्वयंकृत्वापरान्नेनोपजीवति ॥ ४९ ॥ सततंप्रातरुत्थाय
परपाकरतस्तुसः गृहस्थधर्मोयोविप्रोददातिपरिवर्जितः ५० ऋषिभिर्धर्मतत्त्वज्ञैरपचः
परिकीर्तितः युगेयुगेतुयेधर्मास्तेषुतेषुचयेद्विजाः ॥ ५१ तेषांनिंदानकर्तव्यायुगरूपाहि
तेद्विजाः हुंकारंब्राह्मणस्योक्त्वात्वंकारंचगरीयसः ५२ स्नात्वातिष्ठन्नहःशेषमभिवाद्यप्र
सादयेत् ताडयित्वातृणेनापिकंठेबध्वापिवाससा ५३ विवादेनापिनिर्जित्यप्रणिपत्य
प्रसादयेत् अवगूर्यत्वहोरात्रंत्रिरात्रंक्षितिपातने ५४ अतिकृच्छ्रंचरुधिरेकृच्छ्रोभ्यंतर स्मृ०
रशोणिते नवाहमतिकृच्छ्रःस्यात्पाणिपूरान्नभोजनः ५५ त्रिरात्रमुपवासःस्यादऽति २९
कृच्छ्रःसउच्यते सर्वेषामेवपापानांसंकरेसमुपस्थिते ५६ दशसाहस्रमभ्यस्तागाय

त्रीशोधनंपरम् ॥ इतिपाराशरेधर्म्मशास्त्रएकादशोऽध्यायः ॥ ११ ॥ दुःस्वप्नंयदिप
श्येत्तुवांतेवाक्षुरकर्म्मणि मैथुनेप्रेतधूमेचस्नानमेवविधीयते १ अज्ञानात्प्राश्यविण्मु
त्रंसुरासंस्पृष्टमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः २ अजिनंमेखलादंडो
भैक्ष्यचर्याव्रतानिच निवर्त्ततेद्विजातीनांपुनःसंस्कारकर्मणि ३ विण्मूत्रस्यचशुद्ध्यर्थंप्राजा
पत्यंसमाचरेत् पंचगव्यंचकुर्वीतस्नात्वापीत्वाशुचिर्भवेत् ४ जलाग्निपतनेचैवप्रव्रज्या
नाशकेषुच वृत्यावसितवर्णानांकथंशुद्धिर्विधीयते ५ प्राजापत्यद्वयेनैवतीर्थाभिगमने
नच वृषैकादशदानेनवर्णाःशुद्ध्यंतितेत्रयः ६ ब्राह्मणस्यप्रवक्ष्यामिवनंगत्वाचतुष्पथे स
शिखंवपनंकृत्वाप्राजापत्यद्वयंचरेत् गोद्वयंदक्षिणांदद्याच्छुद्धिंपाराशरोब्रवीत् मुच्यतेते
नपापेनब्राह्मणत्वंचगच्छति ८ स्नानानिपंचपुण्यानिकीर्तितानिम नीषिभिः आग्नेयंवा
रुणंब्राह्म्यंवायव्यंदिव्यमेवच ९ आग्नेयंभस्मनास्नानमवगाह्यतुवारुणं आपोहिष्ठेतिच
ब्राह्म्यंवायव्यंगोरजःस्मृतम् १० यत्तुसातपवर्षेणस्नानंतद्दिव्यमुच्यते तत्रस्नात्वातुगं

प० गायांस्नातोभवतिमानवः ११ स्नातुंयांतंद्विजंसर्वेदेवाःपितृगणैःसह वायुभूतास्तुगच्छं
२६ तितृषार्ताःसलिलार्थिनः १२ निराशास्तेनिवर्तंतेवस्त्रनिष्पीडनेकृते तस्मान्नपीडयेद्वस्त्र
मकृत्वापितृतर्पणम् १३ रोमकूपेष्ववस्थाप्ययस्तिलैस्तर्पयेत्पितृन् तर्पितास्तेनतेसर्वे
रुधिरेणमलेनच १४ अवधुनोतियःकेशान्स्नात्वाप्रस्रवतेद्विजः आचमेद्वाजलस्थोपि
सवाह्यःपितृदैवतैः १५ शिरःप्रावृत्यकंठंवामुक्तकक्षाशिखोपिवा विनायज्ञोपवीतेनआ
चांतोप्यशुचिर्भवेत् १६ जलेस्थलस्थोनाचामेज्जलस्थश्चवाहिस्थले उभेस्पृष्ट्वासमाचा
मेदुभयत्रशुचिर्भवेत् १७स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्प्पणे आचांतःपुनराचा
मेद्वासोविपरिधायच १८ क्षुतेनिष्ठीवनेचैवदंतोच्छिष्टेतथाऽनृते पतितानांचसंभाषेदाक्षि
णंश्रवणंस्पृशेत् १९ भास्करस्यकरैःपूतंदिवास्नानंप्रशस्यते अप्रशस्तंनिशिस्नानंराहो स्मृ०
रन्यत्रदर्शनात् २० मरुतोवसवोरुद्राआदित्याश्चाथदेवताः सर्वेसोमेप्रलीयंतेतस्माद्दा २६
नंतुसंग्रहे २१ खलयज्ञेविवाहेचसंक्रांतौग्रहणेतथा शर्वर्यांदानमस्त्येवनाऽन्यत्रतुविधी

यते २२ पुत्रजन्मानियज्ञेचतथाचात्ययकर्माणि राहोश्चदर्शनेदानंप्रशस्तंनान्यदानिशि
२३महानिशातुविज्ञेयामध्यस्थंप्रहरद्वयम् प्रदोषपाश्चिमौयामौदिनवत्स्नानमाचरेत्२४
चैत्यवृक्षाश्चितिःपूयश्चंडालःसोमविक्रयी एतांस्तुब्राह्मणःस्पृष्ट्वासवासाजलमाविशेत्
२५अस्थिसंचयनात्पूर्वंरुदित्वास्नानमाचरेत् अतर्दशाहेविप्रस्यह्यूर्ध्वमाचमनंस्मृतम्२६
सर्वंगंगासमंतोयंराहुग्रस्तोदिवाकरे सोमग्रस्तथैवोक्तंस्नानदानादिकर्मसु २७ कुशैःपू
तंभवेत्स्नानंकुशेनोपस्पृशेद्द्विजः कुशेनचोद्धृतंतोयंसोमपानसमंभवेत् २८अग्निकार्यात्प
रिभ्रष्टाःसंध्योपासनवर्जिताःवेदंचैवानधीयानाःसर्वेतेवृषलाःस्मृताः २९ तस्माद्वृषलभी
तेनब्राह्मणेनविशेषतः अध्येतव्योप्येकदेशोयदिसर्वंनशक्यते ३० शूद्रान्नरसपुष्टस्या
धीयमानस्यनित्यशः जपतोजुह्वतोवापिगतिरूर्ध्वानविद्यते ३१ शूद्रान्नंशूद्रसंपर्कःशू
द्रेणतुसहासनम् शूद्रात्ज्ञानागमश्चापिज्वलंतमपिपातयेत्३२यःशूद्र्यापाचयेन्नित्यंशू
द्रीचगृहमेधिनी वर्जितःपितृदेवभ्योरौरवंयातिसद्विजः ३३मृतसूतकपुष्टांगंद्विजंशूद्रान्न

प० भोजिनम् अहंतन्नाविजानामिकांकांयोनिंगमिष्यति ३४ गृध्रोद्वादशजन्मानिदशजन्मा
२७ निसूकरः स्वयोनौसप्तजन्मानिइत्येवंमनुरब्रवीत् ३५ दक्षिणार्थंतुयोविप्रःशूद्रस्यजु
हुयाद्धविःब्राह्मणस्तुभवेच्छूद्रःशूद्रस्तुब्राह्मणोभवेत् ३६ मौनव्रतंसमाश्रित्यआसीनोनव
देद्द्विजः भुंजानोहिवदेद्यस्तुतदन्नंपरिवर्जयेत् ३७ अर्द्धभुक्तेतुयोविप्रस्तस्मिन्पात्रेजलं
पिवेत् हतंदैवंचपित्र्यंचआत्मानंचैवघातयेत् ३८ भुंजानेषुतुविप्रेषुयोग्रेपात्रंविमुंचति
समूढःसचपापिष्ठोब्रह्मघ्नःसखलूच्यते ३९ भाजनेषुचतिष्ठत्सुस्वस्तिकुर्वंतियेद्विजाः
नदेवास्तृप्तिमायांतिनिराशाःपितरस्तथा ४० अस्नात्वावैनभुंजीतअजप्त्वाग्निमपूज्यच
नपर्णपृष्ठेभुंजीतरात्रौदीपंविनातथा ४१ गृहस्थस्तुदयायुक्तोधर्ममेवानुचिंतयेत् पोष्य
वर्गार्थसिद्ध्यर्थंन्यायवर्तीसवुद्धिमान् ४२ न्यायोपार्जितवित्तेनकर्तव्यंह्यात्मरक्षणम् अ स्मृ०
न्यायेनतुयोजीवेत्सर्वकर्मवहिष्कृतः ४३ अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधिः दृष्ट २७
मात्राःपुनंत्येतेतस्मात्पश्येत्तुनित्यशः ४४ अरणिंकृष्णमार्जारंचंदनंसुमणिंघृतम् तिला

न्कृष्णाजिनंछागंगृहेचैतानिरक्षयेत् ४५ गवांशतंसैकवृषंयत्रातिष्ठत्ययंत्रितम् तत्क्षेत्रंद
शगुणितंगोचर्मपरिकीर्तितम् ४६ ब्रह्महत्यादिभिर्मर्त्योमनोवाक्कायकर्मभिः एतद्गोचर्मदा
नेनमुच्यतेसर्वकिल्विषैः ४७ कुटुंबिनेदरिद्रायश्रोत्रियायविशेषतः यद्दानंदीयतेतस्मैत
द्दानंशुभकारकम् ४८ वापीकूपतडागाद्यैर्वाजपेयशतैर्मखैः गवांकोटिप्रदानेनभूमिहर्तान
शुद्ध्यति ४९ अष्टादशदिनादर्वाक्स्नानमेवरजस्वला अतऊर्ध्वंत्रिरात्रंस्यादुशनामुनिर
ब्रवीत् ५० युगंयुगद्वयंचैवात्रियुगंचचतुर्युगम् चांडालसूतिकोदक्यापतितानामधःक्रमात्
५१ ततःसन्निधिमात्रेणसचैलंस्नानमाचरेत् स्नात्वावलोकयेत्सूर्यमज्ञानात्स्पृशतेयदि
५२ विद्यमानेषुहस्तेषुब्राह्मणोज्ञानदुर्बलः तोयंपिबतिवक्त्रेणश्वयोनौजायतेध्रुवम् ५३
यस्तुक्रुद्धःपुमान्ब्रूयाज्जायायास्तुअगम्याताम् पुनरिच्छतिचेदेनांविप्रमध्येतुश्रावयेत्
५४ श्रांतःक्रुद्धस्तमोंधोवाक्षुत्पिपासाभयार्दितः दानंपुण्यमकृत्वावाप्रायश्चित्तंदिनत्रयम्
॥ ५५ ॥ उपस्पृशेत्त्रिषवणंमहानद्युपसंगमे चीर्णांतेचैवगांदद्याद्ब्राह्मणान्भोजयेद्दश

प० ॥ ५६ ॥ दुराचारस्यविप्रस्यनिषिद्धाचरणस्यच अन्नंभुक्त्वाद्विजःकुर्यादिनमेकमभो
२८ जनम् ५७ सदाचारस्यविप्रस्यतथावेदांगवेदिनः भुक्त्वान्नंमुच्यतेपापादहोरात्रांत
रान्तरः ५८ ऊर्ध्वोच्छिष्टमधोच्छिष्टमंतरिक्षंमृतौतथा कृच्छ्रत्रयंप्रकुर्वीतआशौचमर
णेतथा ५९ कृच्छ्रंदेव्ययुतंचैवप्राणायामशतद्वयम् पुण्यतीर्थेनार्द्रशिरःस्नानंद्वादशसं
ख्यया ६० द्वियोजनंतीर्थयात्राकृच्छ्रमेकंप्रकल्पितं गृहस्थःकामतःकुर्याद्रेतसःस्ख
लनंभुवि ६१ सहस्रंतुजपेद्देव्याःप्राणायामैस्त्रिभिःसह ६ चातुर्विद्योपपन्नस्तुविधि
वद्विप्रघातके ६२ समुद्रसेतुगमनंप्रायाश्चित्तंसमादिशेत् सेतुबंधपथेभिक्षांचातुर्व
र्ण्यात्समाचरेत् ६३ वर्जयित्वाविकर्मस्थान्छत्रोपानद्विवर्जितः अहंदुष्कृतकर्मावैमहा
पातककारकः ६४ गृहद्वारेषुतिष्ठामिभिक्षार्थीब्रह्मघातकः गोकुलेषुवसेच्चैवग्रामेषु स्मृ०
नगरेषुच ६५ तपोवनेषुतीर्थेषुनदीप्रस्रवणेषुच एतेषुख्यापयन्नेनःपुण्यंगत्वातुसागरम् २८
६६ दशयोजनविस्तीर्णंशतयोजनमायतम् रामचंद्रसमादिष्टंनलसंचयसंचितम् ६७